०भा०
२७॥

तवैकैकशक्तेरपि प्रभावज्ञा ब्रह्मादयो नसंति किंपुनस्तव मूलशक्तेरित्याह वृत्त इति ॥ वनजं जीवनमुवनं वनमिति कोशाद्बुबं जलं तस्माज्जातं वनजं कमलं वनजमेव शय्या स्वामिनी कमलवासिनीत्यर्थः ॥ तथापर
शक्त्या श्रमहृत्तया वर्त्ततोऽपि धातूनामनेकार्थत्वात विवाहितोपि मधुसूदनश्च मधुदैत्यनाशकोपि महापराक्रमवान् विस्मृर्मिदं हर्षितः त्वनैवाचरति व्यवहरति ॥ अहमेतस्यानयोग्योस्मीत्यभिप्रायेण लक्ष्मींप्राप्या
पिनहर्षेण व्यवहरतीत्यर्थः ॥ अतएव सर्वदा ध्यानस्थ एव भवतीति भावः ॥ नन्वेवं चेत् किमिति परया लक्ष्म्या त्वत्पादसंवाहनं कारयतीति चेत्तत्राह पादौ नवादिपुरुषः ॥ नत्वत्पादसंवाहनमादिपुरुषः कार
यति ॥ किंतु लोकेऽस्पृश्यत्वात् तव पावकेन शुद्धिकारकेण करेण हस्तेन निजौ पादौ शुभौ पवित्रौ करोति च ॥ तथाच विष्णुरेकशक्तिप्रभावज्ञोऽपि न भवति कुतः पुनर्मूलशक्तेः प्रभावज्ञ इत्यर्थः ॥४६
॥ नवोन्नके श्रुत्वा देववद्यमाणं सम्भवति इत्युत्तमे तते वांछत्यहो इति ॥ अशोकवृक्षस्य हि स्वभावः पादताडनेन आत्मानं वर्धयतीति तथाच स्ववर्धनार्थं पादताडनं स्वकृतीत्युच्यते तथाचनाट्ट
शाशोक इवाति कामं पयेष्टं यथा स्यात्तथा प्रमुदितो हर्षितो विस्मृतः पुरुषस्तव पादाहतिं त्वत्कृतपादताडनं वांछति तदिदमहो आश्चर्यमित्यर्थः ॥ तां च पादाहतिं सकलदेवनुतं स्मरारेः पतिं पादे प्रणतं च दृष्ट्वा सु
ष्ठिता कुपिता त्वं करोषि तदेतन्नवोन्नके श्रुत्वा भावेन नहं गच्छत इति भावः ॥४७ ॥ किंच वक्षःस्थल इति ॥ हे देवि तस्य विष्णोर्वक्षःस्थले पर्यंकवत्सदैव वससि किंदृशी घने मेघे क्षणस्थायी सौदाम
नी विद्युल्लतेव ॥ तेन किं तद्धृदयेवाहनेनासौ जगदीश्वरोपि ते तव वाहनं न जातः किंतु जात एवेति तवैकदेशशक्तेरेवं महिमा किंपुनस्तव मूलप्रकृतेरिति भावः ॥४८॥ ४९॥ ननु त्वं युवतीभावं ग

वृत्तस्त्वयाहरिरसौ वनजेशयापि नैवाचरत्यपि मुदं मधुसूदनश्च ॥ पादौ नवादिपुरुषः किल पावकेन कृत्वा करोति च करेण शुभौ पवित्रौ ॥४६॥ वांछत्य
हो हरिरशोक इवाति कामं पादाहतिं प्रमुदितः पुरुषः पुराणः ॥ तां त्वं करोषि रुषिता प्रणतं च पादे दृष्ट्वा पतिं सकलदेवनुतं स्मरातेम् ॥४७॥ वक्षःस्थले वस
सि देवि सदैव तस्य पर्यंकवत्सुचरिते विपुलेऽतिशांते ॥ सौदामनीव सुघने सुविभूषिते च किं तेन वाहनमसौ जगदीश्वरोपि ॥४८॥ त्वं चेज्जहासि म
धुसूदनमंब कोपान्नैवार्चितोपि स भवेत्किल शक्तिहीनः ॥ प्रत्यक्षमेव पुरुषं स्वजना त्यजंति शांतं श्रियोज्झितमतीव गुणैर्वियुक्तम् ॥४९॥ ब्रह्मादयः सु
रगणेन ननु किं युवत्यो ये त्वत्पदांबुजमहर्निशमाश्रयंति ॥ मन्ये त्वयैव विहिताः खलु ते पुमांसः किं वर्णयामि तव शक्तिमनंतवीर्ये ॥५०॥ त्वं नाऽपुमा
न च पुमानिति मे विकल्पो याकाऽसि देवि सगुणा ननु निर्गुणा वा ॥ तां त्वां नमामि सततं किल भावयुक्तो वांछामि भक्तिमचलां त्वयि मातरं ते ॥५१॥

नोऽस्तीति तत्त्वं समानुग्रहयोग्यो नास्तीति चेत्तत्राह ब्रह्मादय इति ॥ ये त्वत्पदांबुजमहर्निशमाश्रयंति ते ब्रह्मादयः किं युवत्यो न जाताः किंतु कदाचिन्मणिद्वीपे गताः संतो जाता एव ॥ तथाच ते यथा त्व
दनुग्रहयोग्या एव महमप्यस्मीति भावः ॥ मन्ये त्वयैवेति ॥ सांप्रतं पुमांसोपि ते त्वयैव कृताः एवं यदीमां करोषि पुमांसं तर्हि किमहं न स्यां किंतु भविष्याम्येव ॥ ननु किं मयि युवत्याः पुरुषत्वप्रदायि
काशक्तिरस्ति तत्राह किं वर्णयामीति ॥ हे अनंतवीर्ये तव शक्तिमहं पामरः किं वर्णयामि यावदानामप्यविषया इत्यर्थः ॥५०॥ त्वं नापुमानिति ॥ अपुमानिति च्छेदः ॥ न च पुमान्
साम्यावस्थमायोपाधिकब्रह्मणि लिंगत्रयाभावात् ॥ इति मे विकल्पो वितर्को मनसि वर्तत एव ॥ तर्हि कथं भजनं क्रियते गुणज्ञानाभावादिति चेत्तत्राऽऽह याकाऽसीति ॥ गुणज्ञाना
भावेप्येवं रीत्याऽपि किं भजनं न संभवतीत्यर्थः ॥ तथाच श्रुतिः ॥ अस्तीत्येवोपलब्धव्य इत्यतो हे देवि त्वां तादृशीं नमामि भावो भक्तिस्तद्युक्तः ॥ किंचांते ऽचलां भक्तिं वांछामि ना
न्यांतत्किंचिदिति ॥ ५१ ॥

॥ॐ॥ ॥ॐ॥ ॥ॐ॥ ॥ॐ॥ ॥ॐ॥ ॥ॐ॥

॥ ३२ ॥ अत्र तां कुर्वन्निति ॥ अयं शिवस्त्वं प्राप्स्यतीति भक्तं मामपि च्यावनैव भवेद् यापितव प्रार्थनानुरोधेन मा त्वं सुमा भविष्यति पुनर्मा त्वं स्त्रीभविष्यति पुनर्मा त्वं पुरुषरत्नं सुवाचेत्यर्थः ॥ ३३ ॥ ३४ ॥ हर्म्ये सुगृहम्यां
तेरे चेत्यर्थः ॥ नाभ्यनंदन् आसीत् प्रजानां ह्लादे रूपो राजेति लोकनिंद्ये इति भावः ॥ ३५ ॥ नृपातिः सुहृद्यो राज्यं प्रतिष्ठानं नामकं पुरं चदत्वेत्यर्थः ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ को वेत्तीति ॥ एतदखिलं तवैश्वर्यमादृशे
कृपणे दया चेयत्तया को वेत्ति न कोपीत्यर्थः ॥ विस्मयो मे इति ॥ अहो भगवत्याः किं यदैश्वर्यं तिष्ठति किं यतीचया मेरे दयास्तीति ॥ ४२ ॥ कुत आश्चर्यमिति चेत्तत्राह शंभुरिति ॥ एते महाप्रभाववंतोऽपि तव प्रभावं न जानं
ति तदाऽगुणो गुणा श्रूयते न्योमि तु मम कथं कुर्यात् ज्ञास्यामि न कदापीत्यर्थः ॥ यतो न जानाति न तवाश्चर्यमिति भावः ॥ ४३ ॥ विष्णुर्जानातीति चेत्तत्राह जानातीति ॥ सत्यं विष्णुर्जानाति किंतु सात्त्विकीं

तस्यैः समागवांस्तस्य ...ः प्रददौ वांछितं वरम् ॥ वसिष्ठः प्रार्थयामास पुत्रं त्वं वरतः प्रियस्य च ॥ ३२ ॥ शंकरस्तु गिरिजां वाचमनं तां कुर्वन्नुवाच ह ॥ मासं पुमांस्तु भविता मा
सं स्त्रीभव पतिः किल ॥ ३३ ॥ इत्थं प्राप्य वरं राजा जगाम स्वगृहं पुनः ॥ चक्रे राज्यं स धर्मात्मा वसिष्ठस्याप्यनुग्रहात् ॥ ३४ ॥ स्त्रीत्वे तिष्ठति हर्म्येषु पुंस्त्वे राज्यं प्रशास्ति
च ॥ प्रजास्तस्मिन्समुद्विग्ना नाभ्यनंदन्महीपतिम् ॥ ३५ ॥ कालेन यौवनं प्राप्ताः पुत्राः पुरूरवादयः ॥ प्रतिष्ठाने नृपतिस्तस्मै दत्त्वा राज्यं वनं ययौ ॥ ३६ ॥ गत्वा तस्मि
न्वने रम्ये नानाद्रुमसमाकुले ॥ नारदान्मंत्रमासाद्य नवाक्षरमनुत्तमम् ॥ ३७ ॥ जजाप मंत्रमत्यर्थं प्रेमपूरितमानसः ॥ परितुष्टा तदा देवी सगुणा ता
रिणी शिवा ॥ ३८ ॥ सिंहारूढा स्थिता चाग्रे दिव्यरूपा मनोरमा ॥ वारुणीपानसंमत्ता मदाघूर्णितलोचना ॥ ३९ ॥ दृष्ट्वा तां दिव्यरूपां च प्रेमाकुलित
लोचनः ॥ प्रणम्य शिरसा प्रीत्या तुष्टाव जगदंबिकां ॥ ४० ॥ इलोवाच ॥ दिव्यं च ते भगवति प्रथितं स्वरूपं दृष्टं मया सकललोकहितानुरूपम् ॥
वंदे त्वदंघ्रिकमलं सुरसंघसेव्यं कामप्रदं जननि चापि विमुक्तिदं च ॥ ४१ ॥ को वेत्ति तेंऽब भुवि मर्त्यतनुर्निकामं मुह्यंति यत्र मुनयश्च सुराश्च सर्वे ॥
ऐश्वर्यमेतदखिलं कृपणे दया च दृष्ट्वैव देवि सकले किल विस्मयो मे ॥ ४२ ॥ शंभुर्हरिः कमलजो मघवा रविश्च वित्तेशवह्निवरुणाः पवनश्च सोमः ॥ जा
नंति नैव वसवोऽपि हि ते प्रभावं बुध्येत्कथं तव गुणान्नगुणो मनुष्यः ॥ ४३ ॥ जानाति विष्णुरमितद्युतिरंब साक्षात्त्वां सात्त्विकीमुदधिजां सकलार्थदां च ॥
कोसजस्तु हि रजोमां किल तामसीं त्वां वेदांबिके न तु पुनः खलु निर्गुणां त्वाम् ॥ ४४ ॥ क्वाहं सुमंदमतिरप्रथितप्रभावः क्वायं तवातिनिपुणो मयि सुप्रसादः ॥
॥ जाने भवानि चरितं करुणासमेतं यत्सेवकांश्च दयसे त्वयि भावयुक्तान् ॥ ४५ ॥ ॥छ॥ ॥छ॥ ॥छ ॥छ॥ ॥छ॥

शक्तिं लक्ष्मीरूपामेव केवलं जानाति ॥ न ह्यामयाव स्थात्मिकां तुरीयां निर्गुणाम् ॥ तर्हि कोऽत्र ह्या राजसीं शक्तिमेव केवलं जानाति ॥ तथाह रजोमां तामसीमेव केवलं जानाति न तु पुनर्नि
र्गुणाम् ॥ एकैकशक्तिज्ञातार एवैते न तुरीयास्वरूपनिर्गुणज्ञातार इत्यर्थः ॥ ४४ ॥ ...ताहशी त्वं सर्वान्स्वकृपापि स्वभक्तस्याति सुलभासीत्याह क्वाहमिति ॥ हे मातरहं सुमंदमतिः क्व तथा
तवायं मयि सुप्रसादः क्व अतिदूरमित्यर्थः ॥ तथापि माहृशानेपि सेवकांस्त्वयि भावयुक्तान्यद्यस्मात्कारणाद्दयसे दयां करोषी तस्मात्स्वभक्तविषये तव चरितं करुणासमेतम
स्तीति जाने निश्चिनोमि ॥ ततः स्वभक्तस्याति सुलभासीति सत्यमेवेति भावः ॥ ४५ ॥ ॥छ ॥ ॥छ॥ ॥छ॥ ॥छ ॥ ॥छ॥ ॥छ ॥

र०टी० ॥ॐ श्रीगणेशायनमः मातापितृभ्यांजगतोनमोवामार्द्धजानये सद्योदक्षिण दृक्पातसंकुचद्वामदृष्टये १ अंतरायतिमिरोपशांतयेशान्तपावनमचि
सं०१ न्त्यवैभवम् तन्नरंवपुषिकुञ्जरंमुखेमन्महेकिमपितुन्दिलंमहः २ शरणंकरवाणिशर्मदंतेचरणंवाणिचराचरोपजीव्यम् करुणामसृ
१ णैःकटाक्षपातैःकुरुमामम्बकृतार्थसार्थवाहम् ३ वाणींकाणभुजीमजीगणदवाशासीच्चवैयासकीमन्तस्तन्त्रमरंस्तपन्नगगवीगुम्फेषुचाजा
गरीत् वाचामाकलयद्रहस्यमखिलंयश्चाक्षपादस्फुरांलोकेभूद्यदुपज्ञमेवविदुषांसौजन्यजन्यंयशः ४ मल्लिनाथःकविःसोयं मन्दा
त्मानुजिघृक्षया व्याचष्टेकालिदासीयंकाव्यत्रयमनाकुलम् ५ कालिदासगिरांसारं कालिदासःसरस्वती चतुर्मुखोयथासाक्षाद्विदु
र्नान्येतुमादृशाः ६ तथापिदक्षिणावर्त्तनाथाद्यैःक्षुण्णवर्त्मसु वयंचकालिदासोक्तिष्ववकाशंलभेमहि ७ भारतीकालिदासस्यदुर्व्या
ख्याविषमूर्च्छिता एषासञ्जीविनीटीकातामद्योज्जीवयिष्यति ८ इहान्वयमुखेनैवसर्वंव्याख्यायतेमया नामूलंलिख्यतेकिञ्चिन्नान
पेक्षितमुच्यते ९ इहखलुसकलकविशिरोमणिःकालिदासःकाव्यंयशसेऽर्थकृतेव्यवहारविदेशिवेतरक्षतयेसद्यःपरनिर्वृतयेका
न्तासंमिततयोपदेशयुजेइत्याद्यालङ्कारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयस्साधनतांकाव्यालापांश्चवर्जयेदित्यस्यनिषेधशा
स्त्रस्यासत्काव्यविषयतांचपश्यन् रघुवंशाख्यंमहाकाव्यंचिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसा
धनभूतविशिष्टदेवतानमस्कारस्याशीर्नमस्क्रियावस्तुनिर्देशोवापितन्मुखमित्याशीर्वादाद्यन्यतमस्यप्रबन्ध राम
मुखलक्षणत्वात्काव्यनिर्माणस्यविशिष्टशब्दार्थप्रतिपत्तिमूलत्वेनविशिष्टशब्दार्थयोश्चशब्दजालम् [illegible] ते सर्वस्यवाङ्मात्रस्य १
र्थस्वरूपमखिलंधत्तेमुग्धेन्दुशेखरः[illegible]वायुपुराणसंहितावचनबलेनपार्वतीपरमेश्वरायत्तत्वदर्शनात्तत्प्रतिपित्सयातावेवा
भिवादयते

काशीमेआदिविश्वेश्वरकेपासमहल्लाघुघुरानास्वामाकीगलीबावूसाहबबावूहरखचंद्रजीके
बाडेमेंदाऊअग्निहोत्रीकेगणेशयंत्रमेंरघुवंशटीकामल्लनाथीसंयुक्तछपा।लिखालछमनचौ
बेछापनेवालाघुरविन जिसेलेनाहोउसेढुंढिराजगणेशपरदाऊकेदुकानमेमिलेगासं॰१९१८ मि॰
॥ फा॰सु॰८ वारशुक्र॰ ॥

घंतो दाहरणचतुष्टयमद्विन इत्यत्र वक्तुमुचितं कश्चित्तु तर्थेत् ताठस्तत्र नदोषः चुराशीलंमस्या इति चौरी अन्नू प्रत्ययांतः स्त्रीपुंसाभ्यामिति नञ्स्नञौ स्त्रि
यांभवास्त्रैणी पुंसि भवा पौंस्नी शाक्तिः प्रहरणमस्या इति शाक्तिकी शाक्तियष्टोरीकणिती कण् गर्गस्यापत्यमिति गर्गादेरिति ण्यः गार्ग्यः स्त्र्यपत्येतु
नदादित्वादीप् यस्येत्यलोपः हलान्ताद्धितयस्येति यलोपे गार्गी पक्षे गार्ग्यायणीति ण्यंता द्गार्ग्यशब्दात्स्त्रियां नदादित्वादीप् स्वार्थे लोहितस्यापत्यं
स्त्री लोहितायनी लोहितादिर्गर्गाद्यंतर्गणः ण्यंताल्लौहित्यशब्दात् स्त्रियामायनण् आसुरस्यापत्यं स्त्रीति अण्ण तादासुरशब्दात्स्त्रियामायनण् अ-
नंत्यवयोवाचिनोऽदंतात् स्त्रियामीप् कालकृताशरीराऽवस्थावयः वयांसि चत्वारि त्रीणि च संति यथा आद्ये वयसि नाधीतं द्वितीये नार्जितं धनं तृतीये
न तपस्तप्तं चतुर्थे किं करिष्यति पिता रक्षति कौमारे भर्ता रक्षति यौवने पुत्रस्तु स्थविरीभावे न स्त्री स्वातंत्र्यमर्हति उपचयापचयलक्षणे द्वे वयसी त्यन्ये वधू

अनंत्यवयोवाचिनोऽदंतात्स्त्रियामीप् कुमारी किशोरी वधूटी चिरंटी तरुणी तूलनी अदंतात्किं शिशुः ऊधोन्तस्य बहुव्री
हेर्नङ् स्त्रियाम् कुण्डोध्नी घ्नूध्नी अत्यूध्नी वयोवाचिनो हायनस्येप् संख्यादेर्बहुव्रीहेर्वयोवाचि हायनान्तादीप् स्यात् आपि प्राप्ते वचनं
संख्यादेर्बहुव्रीहेर्दामान्ताच्चडाबोपोर्विकल्पेन प्राप्तयोर्वचनं द्विदाम्नी

ट चिरंट तरुण तलुन शब्दा यौवन वाचिनः ऊधान्तस्य बहुव्रीहेर्नङ् स्त्रियाम् अकार उच्चारणार्थः बहुव्रीहिग्रहणेनैव तदंतलाभादंतग्रहणं स्पष्टप्रतिप
त्त्यर्थे न्वणाई बितिप्राप्तस्येपो निषेधः अनेन प्रतिषिध्यते यथा डाप् वेगेति वैकल्पिको डाप् उपधालोपिनो बहुव्रीहेर्वेति वैकल्पिक ईप् अन्नंता द्बहुव्रीहेः
र्नेति निषेधश्च कुंडमिव ऊधो यस्याः सा ईप्यनोऽल्लोप इत्यल्लोपे कुंडोध्नी द्वे ऊधसी यस्याः सा द्व्यूध्नी अशयितमूधो यस्याः सा अत्यूध्नी स्त्रियामिति किं
कुंडाधो वनुकं बहुव्रीहेरिति किं प्राप्तं ऊधः प्राप्तोधाः द्वितीयातत्पुरुष ॥ ॥

त्रिचतुर्भ्यांहायनस्यणत्वं आभ्यांपरस्यवयोवाचकस्यहायनस्यणत्वंवाच्यं त्रयोहायनायस्याःसात्रिहायणी चत्वारो हायनायस्याःसा चतुर्हाय-
णीबाला हायनोब्दशरत्समा इत्यमरः इंद्रादेरानीप् इंद्रआदिर्यस्यसइंद्रादिस्तस्मादिंद्रादेर्गणात् स्त्रियामानीप् स्यात् पुंयोगेत्यपकृष्यते पितृकरणसा
मर्थ्यात्ङीपइत्यत्रानीपोपिग्रहणंभवति ननु-ह्रस्वादिरे वानीबस्तुकिमनेनदीर्घोच्चारणेन अत्राहुः ब्राह्मणीति सिद्ध्यर्थंदीर्घग्रहणं ब्रह्मन् शब्दादानी-
पिकृतेनोवेति टिलोपे ब्रह्माणीति अन्येत्वाहुः ब्रह्माणमानयतिजीवयतीत्यनप्राणनेव्यं तादस्मात्कार्यःणित्यण् प्रत्यये ऽणईबितीपिच कृते ब्रह्माणी
ति सिद्ध्यत्येव माधवस्तु इंद्रं करोति इंद्रयति इन्द्रेतिनाम्नोणिर्डित्करणेइति ष्यंतात् क्विपि इन्द्रः तस्य इन्द्री स्त्री इंद्राणीतिदीर्घपाठा द्दतिनन्व क्वि
वंतस्यक्रियाशब्दत्वेनपुंशब्दत्वाभावात् किंच इन्द्रमिच्छंतीतिइन्द्रीयतिनाम्नो येई चास्येति यप्रत्ययांतात् क्विपि कृते इन्द्रीः इन्द्रियः स्त्रीइन्द्रियाणीत्य

त्रिचतुर्भ्यांहायनस्यणत्वं त्रिहायणी चतुर्हायणी इन्द्रादेरानीप् स्त्रियांपुंयोगे इन्द्राणी वरुणानी भवानी शर्वाणी रु
द्राणीमृडानी आचार्यादणत्वंआचार्यानी हिमारण्ययोर्महत्त्वे महद्धिमं हिमानी महदरण्यमरण्यानी यवाद्दोषे दुष्टो यवो
यवानी यवनाल्लिप्यांयवना नांलिपिर्यवनानी ॥ ॥

तिव्याप्तेश्च वस्तु तस्तु-ह्रस्वादिपाठेःपिहानिर्न इन्द्रस्य स्त्री इन्द्राणी
वरुणस्य स्त्रीवरुणानी भवशर्वमृडरुद्राः पर्यायशब्दाः आचार्यादणत्वं आचार्यशब्दात्परस्यानीपोनस्यणत्वंनस्यात् आचार्यस्यस्त्री आचार्यानी
पुंयोगाभावे आचार्या स्वयंव्याख्यात्री हिमारण्ययोर्महत्वे महत्वयोगे आभ्यामानीप् स्त्रीत्वंचविधीयते महद्धिमं हिमानी हिमानी हिमसंहतिरित्य
मरः महदरण्यमरण्यानी महारण्यमरण्यानीत्यमरः यवाद्दोषे यवाद्दानीप् स्त्रीत्वंच दोषेर्थे दुष्टोय वोयवानी यवत्वजात्यभावे तदाकारानुकृतिर्दोषः य
वाकारानुकृतिमज्जात्यंतरमेवानेनाभिधीयते यवनाल्लिप्यां यवनशब्दादानीप् लिप्यर्थेसाच्च स्त्रीलिंगएव देवनेदमर्थे इत्यणोबाधक आनीप् विधी ६३
यते यवनानांलिपिर्यवनानी लिखिताक्षरविन्यासो लिं ॥ ॥ ६७ ६७ ६७ ६७

ष्ट्रितः षृच्च इच्च उश्च ऋश्चेति ष्ट्रः ष्ट्रः इतो यस्य स ष्ट्रित् तस्मात् ष्ट्रितः वृञ् वरणे रप्रत्ययांता त् स्त्रियामीप् स्यात् वृणोतिषा कोकण इति षाक प्रत्ययः य-
स्येत्यलोपः वराकी कुरुचरी कुरुषु चरतीति अधिकरणोपपदाच्चरतेष्टाविति टः गोशब्दात् अस्त्यर्थे इति मतुः गावः सति यस्याः सा गोमती विदेर्वावसु-
रिति वसु प्रत्ययः वसोर्वी उरित्यु त्वं विदुषी पचेः शतृशानौ तिपृ तेवदिति शतृ प्रत्ययः अपकर्तरीत्यप पचंती दिवः शतृ प्रत्यये दिवादेर्य इति य प्रत्ययः दीव्यं
ती अच्य पोरान्नित्य मितिनुम् तुदेः शतृ प्रत्यये तुदादेरइत्य प्रत्ययः तुदंती वादी पोः शतुर्नुमिति नुम् मन्नंतान्नेप् मन्नंतान्नाम्न ईप् न भवति सीमा दामा
राजन्वत् अन्नंता द्बहुव्रीहेर्न नातत्वात्मातईप् सन भवति बहवो यज्वानो यस्यां सा बहुयज्वा नगरी डाबु वामन्नंतान्नाम्नोन्नंता द्बहुव्री हेश्च डाप् वा स्यात्

ष्ट्रितः षकार टकार उकार ऋकारानुबंधात् स्त्रियामीप् प्रत्ययो भवति षवराकी टकुरुचरी उरुद्वयसी उरुदघ्नी उरुमात्री इत्य
रीउ गोमती विदुषी ऋ पचंती दीव्यंती तुदती तुदंती प्राची प्राञ्ची प्रतीची प्रत्यञ्ची उदीची उदञ्ची तिरश्ची तिर्यञ्ची स्तनंधयी म
न्नंतान्नेप् सीमा सीमानौ दामा दामानौ अन्नंता द्बहुव्रीहेर्न सीमा सीमे सीमाः दामा दामे दामाः बहुयज्वा बहुयज्वे उपधालो
पिनो बहुव्रीहेर्वेप् बहुराज्ञी बहुराजा नदादेः स्त्रियामीप् नदी गौरी सरसी सरवी आशिश्वी अनड्वाही अनडही इत्यादि ॥ ॥

टित्वाट्टिलोपः सीमा दामा ब
हुयज्वा गंगावत् सीम सीमे उभे स्त्रिया मित्यमरः नपुंसि दामेत्यमरः उपधालोपिनो बहुव्रीहेर्वेप् अन्नंता द्बहुव्रीहेरुपधालोपिनो वेप् स्यात् बह-
वो राजानो यस्यां सा बहुराज्ञी ईप्यनइत्यः ल्लोपः ईवभावे डाप् पक्षे डाबीपोरभावः नदादेः नद आदिर्यस्य स नदादिस्तस्मान्नदादेर्गणात् स्त्रियामीप्
स्यात् अनुपसर्जनादेवायं गौणसुरव्यन्यायात् नद इत्यव्यक्तं शब्दं करोतीति पचाद्यप्रत्ययः यस्येत्यलोपः नदी गौणे तु नदीमतिक्रांता स्त्री अतिनदा सुप
र्णशब्दाद पत्ये ढं ण्यण प्रत्ययः आदिस्वरे वृद्धिश्च सुपर्णाया अपत्यं स्त्री सौपर्णेयी ऊरुः प्रमाणं यस्याः सा ऊरुद्वयसी नदी यस्येत्यलोपः प्रमाणे द्वयस- ६२
ट् इति द्वयसडादिः अक्षैर्दीव्यति येति इक प्रत्ययः आक्षिकी इणनशजीसर्तिभ्यः क्वरबिति क्वरप् एति परपुरुषं तच्छीला इत्वरी असती क्वरब् द्वयसडा

काप्यतः कापिई अतइतिच्छेदः ककारेणसहितः आप् काप् तस्मिन् प्रत्ययस्यैव को गृह्यते आपासाह चर्यात् स्त्रियां वर्तमानस्य नाम्नोऽतःस्था
नें इकारोभवति-कापिपरे करोतेस्तृवृणार्विति वुण् णित्वाद्वृद्धिः कारिका एवं पचतेःपाचिकः अतः किंनौकानौशब्दात्स्वार्थेकः प्रत्ययः ककाराभावेतु श
क्नोतीतिशका पचाद्यः प्रत्ययः तपरः किंराकामामक नरकयोरतइः ककारस्यप्रत्ययत्वाभावादप्राप्तौ वचनं ममेयं मामिका अणीनयोरितिममकादेशः
णित्वाद्वृद्धिः अजादित्वादाप् नरान् कायतीति कैशब्दे अस्मात् आतोऽड इति डप्रत्ययः आप् इत्वं च नारिका क्षिपकादीनां न एषामतइकारो न कापि-
क्षिपेर्नाम्युपधात्क इतिकः ध्रुवस्थैर्ये इत्यस्मादपिकः अथवा ध्रुगतिस्थैर्ययोरस्मात्पचाद्यः प्रत्ययः कुटादित्वात् ङित्त्वेनगुणाभावे नुधातोरियुव्
क्षिपाएवाक्षिपका शस्त्रविशेषः ध्रुवाएव ध्रुवका भाजनं चट भेदने ऽस्मात्पचाद्यः चटकासर्वत्राऽपि अज्ञातादौके पुनरापि च ह्रस्वो वेति ह्रस्वः याएव य

काप्यतः कापिपरे पूर्वस्याकारस्येकारो भवति कारिका पाचिका पाठिका अतः किं नौका तपरः किं राका क्षिपकादीनां
न क्षिपका ध्रुवका कन्यका चटका यका सका उपत्यका अधित्यका तारका ज्योतिषि अन्यत्र नारिका वर्णका तांतवे वर्णिका
न्यावर्तका शकुनौ प्राचांउदीचांतु वर्तिका अष्टका आद्वेअष्टिका न्या क्वचिद्वा सूतका सूतिका पुत्रका पुत्रिका वृंदारका वृंदारिका
आर्यका आर्यिका चटकका चटकिका ॥ ॥ साएवसका आभ्यामारव्यातव्ययसर्वादेरित्यकः उपाधिभ्यामासन्नारूढयोरिति

उपत्यका अधित्यका उपत्यकाद्रेरासन्नाभूमिरूर्ध्वमधित्यकेत्यमरः तारकाज्योतिषितरतेर्वुण् अकादेशोवृद्धिश्च ज्योतिर्नक्षत्रं नेत्रकनीनिका च तयोर-
र्थे तारका अन्यत्र तु तारिका वर्णका तांतवे तंतूनां विकारस्तांतवं तस्मिन् वर्णका प्रावारविशेषः वर्णवर्णक्रियाविस्तारगुणवचनेष्विति चौरादिकाद्वुण् ग्रंथ
विशेषस्यव्याख्यात्रीस्तोत्रकर्त्रीवर्णिका वर्तयतीतिवर्तिका वुण्प्रत्ययः शकुनावेववाच्येऽयावकस्यःअन्यस्मिन्नर्थेतुनित्यमित्वं प्राचांपूर्वाचार्याणांमते इ
तोऽभावः उदीचा माधुनिकानां मतेइत्वमित्यर्थः अश्नंति ब्राह्मणायस्यां साष्टका इष्यशिभ्यां तकइतितकः अष्टौपरिमाणमस्या इत्यष्टिका क्वचि ६१
द्वा वा अइतिच्छेदः क्वचित्पूर्वस्याकारोवाभवति कापिपरे पुत्रीएवेति ह्रस्वोवेतिह्रस्वेकृते पुत्रिका पक्षे पूर्वस्य ईपोऽकारः पुत्रकेति सूतशब्दात् स्वा

र्थेकः सूताएवसूतिका सूतकका वृंदमस्या अस्तीति शृंगवृंदाभ्यामारकः वृंदारिका वृंदारका देवतावाची वृंदारक शब्दः पुल्लिंगएव अन्यत्र त्रिलिंगतयान्व त्रिषूत्तरेस्तु पक्रम्य वृंदारकौ रूपिसुख्याविस्यमरः आर्याएव आर्यका पक्षे इत्वं आर्यिका चटका एव चटकिका चटककका निष्क्रांता भस्त्राया इति निर्भस्त्रा पंचमी तत्पुरुषः निर्भस्त्रा एवेति निर्भस्त्रका निर्भस्त्रिका एषाएव एषिका एषका अकः अजाएव अजका अजिका ज्ञाएवज्ञका ज्ञिका द्वे एव द्वके द्विके आख्यानाव्ययसर्वादेरित्यकः निर्गतास्वात् यासानिः स्वानिःस्वा एवेति निःस्वका निःस्विका स्वार्थेकः ह्रस्वोवा कापि तरादौ प्रत्ययेन परे स्त्रियां विहितस्य अस्य ह्रस्वोः तद्वश्चवास्यात् वाशब्दोव्यवस्थार्थस्तेन तरादाविति लब्धम् गंगाएव गंगका ह्रस्वाभावे गंगाकाप्यत इतीत्वे गंगिका ह्रस्वानदीति नदिकान-

निर्भस्त्रका निर्भस्त्रिका एषका एषिका अजका अजिका ज्ञका ज्ञिका द्वके द्विके निस्वका निस्विका ह्रस्वोवा कापि परे तरादौ च पूर्वस्य ह्रस्वोवा गंगाका गंगका गंगिका नदिका नदीका श्रेयसितरा श्रेयसीतरा वाग्रहणादेव संध्यक्षराणां न गोका नौका न्व णईप् दंडिनी दंतिनी मघोनी शुनी पौंस्नी स्त्रैणी गौरी हर्त्री कर्त्री यस्य लोपः इवर्णावर्णयोर्लोपो भवति तद्धितस्य स्वरे यकारे ई पि च औपगवी ऐंद्री ईष्यनोल्लोपः राज्ञी द्विदाम्नी ॥ ॥

टीका स्वार्थेकः अतिशयेन श्रेयसीति श्रेयसितरा श्रेयसीतरा तरमेयस्त्विष्ठाः प्रकर्षे इति तरप्रत्ययः स्त्रियां विहितस्यकिं लक्ष्मीतरा चमूतरा न्वणईप् नुच आच अण्च एषांसमाहारो न्वण् तस्मान्न्वणः अणिति प्रत्ययो नाम्नीति विशेषणात्तदंतविधिः न च प्रत्ययविधौ प्रतिषेधः शंक्यः स्त्रीप्रत्ययेषु तदंतविधिस्वीकारात् नांतात् ऋदंतात् अण्णंताच्च स्त्रियामीप् स्यात् दंडोस्यास्तीति दंडिनी मांतोपधाद्वत्विनाविति नू मघोनी शुनी श्वादेरितिवस्योत्वं कर्त्री करोतेस्तृवृणाविति तृप्रत्ययः यस्य लोपः इश्च अश्च यं तस्य यस्य लोपः स्यात्तद्धितयस्वरयोरीपि च यथा गार्ग्यः काव्यं वासिष्ठः मौनं उपगोरपत्यं स्त्री औपगवी अपत्ये णिष्णण् इंद्रो देवता अस्या इति ऐंद्री दिक् देवतेदमर्थे इत्यण् ईष्यनोल्लोपः अन्नंतस्योपधाऽकारस्य लोपः स्यादीपि राज्ञः स्त्री राज्ञी द्वेदाम्नी यस्याः सा द्विदाम्ना ॥ ॥

परस्य पुंसो वाचकस्य शसः सस्य नः स्यादिति
पंचमी पुल्लिंगात्समानान्तान्नाम्न इति यदा तु लिंगं प्रत्ययार्थस्तदा पुंस इति षष्ठी समानां तान्नाम्नः इतिस्वार्थद्रव्यलिंगसंख्याकारकात्मकः पंचको नामा
उक्तं च एकं द्विकं त्रिकं चाथ चतुष्कं पंचकं तथा नामार्थ इति सर्वेमी पक्षाः शास्त्रेनिरूपिताः स्वार्थश्चानेकविधः स्वरूपजातिगुणाक्रियाद्रव्यसंबंध
र्थः उक्तपंचसु पूर्वस्य पूर्वस्य नामार्थत्वे परः परो विभक्त्यर्थो ज्ञेयः शब्दप्रवृत्तिनिमित्तस्वार्थोस्ति विशेषणत्वात् जातिस्तु द्रव्यं भवति विशेष्यत्वा
भेदात् स्वरूपं यथा डित्थः यदा शब्दरूपेण विशिष्टा जातिः कथ्यते गौरिति तदा गोशब्दस्य स्वरूपं स्वार्थोस्ति विशेषणत्वात् शुक्लो गुणो द्रव्यं भवति विशेष्यत्वात् यदा गुणेन
तु यदा जात्या विशिष्टो गुणः कथ्यते पटस्य शुक्लो गुण इति तदा जातिः स्वार्थो भवति विशेषणत्वात् शुक्लो गुणो द्रव्यं भवति विशेष्यत्वात् यदा गुणेन
विशिष्टं द्रव्यं कथ्यते शुक्लः पट इति तदा विशेषणभूतो गुणः स्वार्थो भवति विशेष्यभूतं पटादिकं द्रव्यं भवति यदा तु द्रव्यमपि द्रव्यांतरस्य विशेषणभ
वतियष्टीः प्रवेशयेत्यादौ तदा यष्ट्यादिकं द्रव्यं विशेषणत्वमापन्नं स्वार्थो भवति पुरुषादि विशेष्यं द्रव्यं भवति दंडीत्यादौ दंडपुरुषसंबंधः स्वार्थो भव-
तिदंडीति द्रव्यं विशेषणं भवति पाचक इत्यादौ क्रिया स्वार्थो भवति पुरुषो द्रव्यं भवति किं च शब्दस्य यत्र विश्रांतिर्वाच्यं द्रव्यं तदिष्यते पर्यवसानभू

॥ शासि शासि परे पूर्वस्य दीर्घो भवति ॥

सिसतासीस्य पामिद् लिंगं स्त्रीत्वादि संख्या एकत्वादिः क
सिरित्यर्थः तच्चानेकप्रकारम् जातिगुणक्रियाद्रव्यस्वरूपमिति गौः शुक्लः पाचकः डित्थः आम् शसीति सूत्रेणौकारस्य स्थाने आत्वे कृते सति सोनः पुंस इत्येत-
र्मादयः कारकविशेषास्तत्र स्वार्थो विशेषणम् द्रव्यं तु विशेष्यमिति निर्गलितार्थः इति पंचपदानि छित्त्वा पुल्लिंगात्समानाच्छसः सस्य न् स्या
त्सूत्रं न प्रवर्तते इत्यर्थः कुतो न उच्यते पदविभागात् यथा स् १ ओ २ न् ३ अः ४ पुंसः ५ किम् बुद्धिः समानादिति किं रायः ग्लावः लो
न् ओकारसंबंधिनोः वर्णात्तु विसर्गः स्यादिति व्याख्येयम् अतो गाः पश्येत्यादौ नत्वं न पुल्लिंगादिति स्वरस्येति पदस्यना-
पविषये एवास्य प्रवृत्तिः समानादम् शसोरल्लोपस्यानिषेधात् अत एव बहुशा इत्यत्र नत्वं न स्यात् दधिकाराद्वा शासि दीर्घश्रुत्योपस्थितस्य
र्मो विशेषणत्वात्तदंतविधिः पूर्वस्य स्वरांतस्य नाम्नो दीर्घः स्यात् ॥ ६ ॥ शासि परे सोनः पुंस इति नत्वे दीर्घत्वं पूर्वं नत्वं ततो दीर्घत्वम् पश्चादल्लोपो वै परीत्यं वा ज्ञेयम्
शासि किम् ॥

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

प्रत्यया भवंति उच्यते ऽनेनेति वचनं एकस्य वचनमेकवचनं द्वयोर्वचनमिति द्विवचनं बहूनां वचनमिति बहुवचनं सरूपाणामेकशेष एकविभक्तौ एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एवशिष्यते रूप्यते बोध्यते इति रूपमर्थः समानं रूपं येषां ते सरूपाः सहादित्वात्समानस्य सादेशः तथा समानं रूपं सरूपं येषां ते सरूपाः सरूपाश्च सरूपाश्चेति सरूपास्तेषामित्येकशेषेण व्याख्यानम् एकविभक्ताविति विभक्तिसारूप्ये उपलक्षणं नत्वेकशेषे निमित्तं एवंचानैमित्तिकत्वेनांतरंगोयमेकशेषः स्याद्युत्पत्तेः प्रागेव प्रवर्तते यद्येतन्नारभ्यते तर्हि प्रत्येकं विभक्तिः स्यात् द्वंद्वश्च प्रवर्तेत आरब्धे त्वेकशेषो भवति न तु द्वंद्वः अनेकपदाभावात् ननु स्याद्युत्पत्तेः प्रागेकशेषप्रवृत्तौ शिष्यमाणं यत्प्रातिपदिकं तदेकमेवार्थं बोधयतीति द्विवचनाद्युत्पत्तौ देवौ देवा इत्यादि नासिध्येत् उच्यते शिष्यमाणो लुप्यमानार्थं कथयति एकशेषस्य वृत्तिषु पाठात् परार्थाभिधानं वृत्तिरिति अत एव लुप्तेपि प्रत्यये लिड् धुक् इत्यादौ कर्ता प्रतीयते एकस्यां विभक्तौ परतः सरूपाण्येवेति किं मातृशब्दयोर्जननीपरिच्छेत्तृवाचिनोर्नैक

स्त्रोर्विसर्ग्गः देवः सरूपाणामेकशेष एकविभक्तौ देवौ देवाः ॥ ७ ॥ अमृशसोरस्य समानादुत्तरयोरमृशसोरकारस्य लोपो भवति देवम् देवौ शसश्शकार श्शसीति विशेषणार्थः सोनः पुंसः पुल्लिंगात्समानादुत्तरस्य शसस्सकारस्य नकारादेशो भवति नत्वाम्शसीत्यात्वे ॥ ॥

शेषो भवति मातृभ्यां मातृभिरित्यादौ सारूप्येपि औजसादिषु वैरूप्यात् नन्वेव पयः पयो नयति देव देव इत्यादावति प्रसंगः स्यात् अधातोरिति चानुवर्तते सह विवक्षायामेकशेषः प्रवर्तते इतरेतरयोगे द्वन्द्वस्य विषये इत्यर्थो नान्यत्र ॥ ७ ॥ अमृशसोरस्य समानाद्धेर्लोपो ऽधातोरित्यतः समानादिति लोप इति अधातोरिति चानुवर्तते अधातोः समानात्परयोरमृशसोरकारस्य लोपः स्यात् अधातोरिति किम् श्रियं भ्रुवमित्यादा वियुवौ सेनान्यं खलपुमित्यादौ लप्यौ सोमपामित्यादौ सवर्णदीर्घः समानादिति किम् रायं ग्लावं सोनः पुंसः पुल्लिंगात्समानान्नाम्नः परस्य शसः सस्य नः स्यात् शस इत्यनुवृत्तं लिंगं नामार्थ इति मते पुंस इति ॥ ॥ ११

विभक्तिरहितमिति किं हरिषु करोषि सुप्सिपोर्माभूत् पदादित्वात्सस्य षोनस्यात् विभक्त्यंतरहितमिति किं देवौ भवंति अत्र द्वित्वाद्यनभिधानेप्य
ऽव्ययादिवत्रैकवचनंस्यात् धातुवर्जितमिति किं अहन्नित्यत्र नाम्नोनोलोपशित्यनेन लोपश्स्यात् अहन्नित्यत्राह् इत्यनेनसत्वं तुन तस्यलाक्ष-
णिकत्वात् अर्थवदिति किं धनंवनमित्यादौ प्रतिवर्णसंज्ञा माभूत् अत्रवार्तिकम् कृत्तद्धितसमासाश्चेति चकारोऽनुक्तसमुच्चयार्थः तेन निपातस्या
नर्थकस्यप्रातिपदिकसंज्ञा वक्तव्येति तस्मादित्यधिकारोयं धातोरित्यतः प्राक्स्यादयोऽणादयश्चप्रत्ययानाम्नः पराःस्युः तस्मादिति पंचमीइ
यं न विश्लेषावधौ विश्लेषस्यासंभवात् किन्तु ऋते आदिषु दिक्शब्द पाठाद्दिग्योगलक्षणापंचमी तत्र परः पूर्वोवा इत्यनियमेनाऽध्याहारे प्रसक्ते
बहुवा उक्तेर्थे सत्र प्रयोगे वेत्यनेन बहोः पूर्वत्वस्य नियतत्वादन्यः प्रत्ययः परएवेति परशब्दोऽध्याहार्यः सिऔजस् १ अम्औशस् २टाभ्यांभिस्
३ ङे भ्यां भ्यस् ४ ङसिभ्यांभ्यस् ५ ङस् ओस् आम् ६ ङि ओस् सुप् ७ सिप्रत्ययस्येकारोऽत्वसोः सावित्यादौ विशेषणार्थः जश्शसोर्जकारश्च

विभक्तिरहितंधातुवर्जितंचार्थवच्छब्दरूपं नामोच्यते तस्मात् सि औ जस् अम् औ शस् टा भ्याम् भिस् ङे भ्याम्
भ्यस् ङसि भ्याम् भ्यस् ङस् ओस् आम् ङि ओस् सुप् नाम्नः पराः स्यादयः सप्त विभक्तयो भवन्ति एकत्वद्वि
त्वबहुत्वेषु एकवचन द्विवचन बहुवचनानि ॥ ॥ कारौजसिश सीत्यनयोर्विषयविभागार्थौ टाप्रत्ययस्य टकारः टेन टानाटौसोःटा
ङ्योरित्यादौ भेदकः ङे ङसि ङस् ङीनाम् ङकारस्तु ङि तीत्यादौ विशेषणार्थः ङसे रिकारो ङसिरदिति विशेषणार्थः सुप्प्रत्ययस्य पकारः प्रत्याहा
रार्थस्तेन सिप्रत्याहारो यथास्यात् स्यादिभेदतो विभक्तिर्द्विधा तत्रासिऔजसित्यादीनां सप्तानां त्रिकाणां प्रथमादयः सप्तम्यंताः प्राचांसंज्ञास्ता
भिरिहापिव्यवहारस्तेषु त्रिकेषुस्त्रीणि त्रीणि वचनानि एकश एकवचनद्विवचनबहुवचन संज्ञकानि संति एकत्वद्वित्व बहुत्वेषु एकत्वद्वित्व बहु
त्वशब्दा इह संख्यापराः संति तेन बहुः पर्वत इतिवैपुल्यवाचिनो ग्रहणं न आश्रयद्रव्यगतेषु एकत्व द्वित्व बहुत्वेषु सत्सु एकवचन द्विवचनबहु
वचन संज्ञकाः ॥ ॥

सएषरामोस्तिकीदृशः दशरथस्यापत्यंदाशरथिः अतइञ्ननृषेरितीञ् सएषयुधिष्ठिरः कीदृशः राजतेइति राजा स एष कर्णः कीदृशःमहां
श्वासौत्यागश्च महात्यागः महात्यागोस्ति यस्यसमहात्यागी मांतोपधाद्वत्विनावितीन् सएष भीमः कीदृशः महांश्वासौवलश्च महाबलः महाब
लोस्ति यस्यसमहाबलः अइकौनेत्यप्रत्ययः॥इतिविसर्गसंधिः ॥ ७ ॥ अविभक्तिनामविभक्तेरन्यदित्यविभक्ति अन्यच्छब्देन शब्दरूपंविशे
ष्यं गृह्यतेतत्क्लीबांतस्यविशेषण मिदंसूत्रेविभक्तिशब्देनतंत्रादिनाविभक्तिः विभक्त्यंतं चेत्युभयमुच्यते विभक्तिशब्देनसह नञ्तत्पुरुषः नञ्
तुद्विधा॥ तथाहि द्वौ नञौतु समाख्यातौ पर्युदासप्रसज्यकौ॥ पर्युदासः सदृग्ग्राही प्रसज्यस्तुनिषेधकृत् ॥ १ ॥ प्राधान्यंतु विधेर्यत्र प्रतिषेधेप्र
धानता पर्युदासःसविज्ञेयोयत्रोत्तरपदेनञ् ॥ २ ॥ अप्राधान्यंविधेर्यत्र प्रतिषेधेप्रधानता ॥ प्रसज्यस्तु सविज्ञेयः क्रियया सहयत्रनञ् ॥ ३ ॥
एवंहि विभक्तिभिन्नं विभक्त्यंतभिन्नमर्थवच्छब्दरूपं संज्ञि नामच संज्ञा विभक्त्यंतुभिन्नमितिकथनेनधातूनां व्यावृत्तिः कृता तेषां तिबादिविभ

सैषदाशरथीरामः सैष राजा युधिष्ठिरः॥सैष कर्णो महात्यागी सैषभीमो महाबलः॥ इतिविसर्गसंधिः॥अविभक्ति
नाम॥ ॥ क्त्यंतत्वात् तच्छब्दरूपं नाम प्रातिपदिकमुच्यते कीदृशं तत् अविभक्ति पर्युदासोऽत्रनञ् गृह्यते विभक्तिसदृशंविभक्ति
भिन्नमित्यर्थः विभक्तिसदृशमिति कथनेनार्थवदेवागतंपुनः कीदृशंविभक्त्यंतभिन्नमिति कथनेनधातुवर्जितमित्यागतंपुनः कीदृशंअर्थ
वत् अत्रार्थशब्दोऽभिधेयवचनोनतुधननिवृत्तिप्रयोजनवचनः यथार्थवान् धनवानित्यर्थः मशकार्थो धूमः मशकनिवृत्तये इत्यर्थः कोर्थः
किंप्रयोजनमित्यर्थः तत्राभिधेयंतु चतुर्विधंजातिगुणाक्रिया द्रव्यभेदात् जातिशब्दायथा गोः अश्वइत्यादयः गुणशब्दाय्यथाशुक्लः कृष्णइ
त्यादयः क्रियाशब्दायथापाचकः गंतेत्यादयः द्रव्यशब्दाः यथा डित्थंकपित्थमित्यादयः ननुवंध्यापुत्राभावशशविषाण गगनकुसुमादीनाम
मर्थाऽभावादेषां नामसंज्ञा नस्यादितिचेदुच्यते अभावस्यापि पदार्थांतरत्वेनाभिधेयत्वाद भावशब्दस्य सिद्धा संज्ञा वंध्यादिशब्दार्थः पुत्रादि
शब्दार्थश्च प्रसिद्ध एवतनयोः संसर्गमारोप्यशब्दप्रयोगसंभवात्तेषामप्यस्ति॥ ७ ७ ७ ७ १८

रेफप्रकृतिकस्य खपे वा रेफः प्रकृतिर्मूलकारणं यस्य स रेफप्रकृतिकस्तस्य रेफप्रकृतिकस्य विसर्गस्य रकारो वा भवति खपे परे वाग्रहणात्
पक्षे विसर्गोपध्मानीयौ अहन् अहन्शब्दस्य विसर्गस्य रो भवति रात्रि षितिरत्वे विसर्गे च कृते ऽयं विधिः प्रवर्तते अहर्पतिः अहःपतिः अहःपतिः
तिः रः षष्ठ्यंतमिदं रेफस्य स्थाने विहितो यो विसर्ज्जनीयस्तस्य रो भवत्यवे परे अवे किं प्रातःकालः रेफप्रकृतिकस्येति किं रामो नम्यः रिलोपो दीर्घ
श्च रइति षष्ठ्यंतमनुवर्तते रि इति सप्तम्यंतं रो लोपः स्याद्रेफे परे चकारो विधेययोर्लोपदीर्घयोः समुच्चयार्थः तेन पूर्वस्वरस्य दीर्घश्च रीति किम् प्रा
तर्वायुः रइति किम् मनोरथः सैषाद्धसे सश्च एषश्च तयोः समाहारः सैषं तस्मादनञ्समासे ऽककारात्सैषात् परस्य विसर्गस्य लोपः स्यात् हसे प

रेफप्रकृतिकस्य खपे वा गीः पतिः गीर्पतिः गीःपतिः अहर्पतिः अहः पतिः अहःपतिः रः रेफसम्बंधिनो वि
सर्जनीयस्य रेफो भवत्यवे परे प्रातरत्र अन्तर्गतः रिलोपो दीर्घश्च रेफस्य रेफे परे लोपो भवति पूर्वस्य च दीर्घः पुनारमते हरी
राजते भानू रम्यः शम्भू राजते सैषाद्धसे सशब्दादेषशब्दाच्च परस्य विसर्ज्जनीयस्य लोपो भवति हसे परे स चरति एष
हसति सशब्दाद्विसर्गस्य लोपः स्वरे लोप एव पादपूरणं चेत् ॥
रेः स इति एष इति च कृता त्त्व सत्वस्य तच्छब्दस्य एतच्छ
ब्दस्य चानुकरणम् अनुकार्य्यानुकरणयोर्भेदे ऽर्थवत्त्वाद्विभक्त्युत्पत्तौ सत्यां द्वंद्वे विभक्तिलोपे च कृते नामत्वात् ङसिपरतः स्मयोऽभावः द्वंद्वे
सर्वादीनां न सर्वकार्यमित्युक्तत्वात् अककारात् किं एषको रुद्रः अनञ्समासे किं असः शिवः हसे किं एषोत्र सशब्दाद्विसर्गस्य लोपः स्वरे लोप
एव पादपूरणं चेत् स इति शब्दस्य विसर्गस्य लोपः स्यात् स्वरे परे चेद्यदि लोपे सत्येव पादः पूर्य्येत पादः श्लोकचतुर्थांश इति पादपूरणमिति किम्
स एवमुक्त्वा लोप एवेत्यवधारणात् अन्यथा पादपूरणे लोपो न सोहमाजन्मशुद्धानामिति ॥ ॥ ॥ ॥

इत्यहोरात्रः समासांतोऽत्यययोऽत्र रात्राह्नाहांता इति पुंस्त्वम् अहोरात्रिरेषा इदमह्न एषारात्रिरस्तीत्यर्थः प्रशस्तमह इत्यहोरूपं प्रशंसाया-
मिति रूपः अहोरूपः गुणवाचको रूपशब्दोप्यत्र रथंतरं सामवेद संज्ञा अहोरथंतरं एषु विसर्गस्य उत्वं नत ओत्वं पदांते किं अहोभ्याम् अतोऽत्युः
आदवेलोपशित्यस्यापवादोयं अतः परस्य विसर्गस्य उत्वं स्यादति अतइति किं अग्निरत्र तपरः किं देवा अत्र सुस्रोत ३ अत्र दूरादाह्वाने इति प्लुतः
अतीति किं देव इह तपरः किं देव आगतः तिष्ठतु पयः अग्निदत्ते त्यत्र गुरोरनृत इति प्लुतः विसर्गस्य उत्वे ओत्वेच एदोतोत इत्यल्लोपः कोऽर्थः हवे अत
इत्यनुवर्तते अतः परस्य विसर्गस्य उत्वं स्यात् हवे आदवेलोपशित्यस्यापवादोयम् अतः किम् वायुर्वंद्यः तपरः किं वेधा वन्द्यः हवे किम् देवः पश्यति

अहोरात्रः अहोरूपम् अहोरथन्तरं अतोत्युः अकारात्परस्य विसर्ज्जनीयस्योकारो भवत्यतिपरे कोर्थः हवे अकारा
त्परस्य विसर्ज्जनीयस्योकारो भवति हवे परे देवो याति मनोरथः आदवेलोपश् अवर्णात्परस्य विसर्जनीयस्य लोपश्
भवत्यवे परे देवा अत्र वाता वान्ति देवा इह स्वरे यत्वं वा देवायिह भोसः भोस् भगोस् अघोस् इत्येतस्य विसर्ज्जनीयस्य लो
पश् भवत्यवे परे भो हर भगो नमस्ते अघो याहि स्वरे यत्वं वा भोस् भगोस् अघोस् विसर्गस्य स्वरे यत्वं वा भवति भोयेहि
भगोयेहि अघोय गच्छतु नामिनोरः नामिनः परस्य विसर्ज्जनीयस्य रेफो भवत्यवे परे अग्निरत्र पटुर्वक्ता उषसो बुधे उ
षसो विसर्ज्जनीयस्य रेफो भवति बुधे परे उषः बुधः उषर्बुधः ॥ ॥

आदवेलोपश् आदिति पंचम्यन्तो भतु
त परत्वं दिव औ इत्यादि निर्देशात् अवे किं देवाः संति स्वरे यत्वं वा लोपशो विकल्पेनाऽपवादोयम् अवर्णात्परस्य विसर्गस्य यत्वं वा स्यात् पक्षे लोपश्
स्वरे किं रामश्चतुरः भोसः भोस् भगोस् अघोस् इति सकारांतानिपाताः संति तत्रा घंताभ्यां प्रत्याहारो भोस् इति गृहीतः भोसः इति षष्ठ्यंत
भोस् भगोस् अघोस् एषां विसर्गस्य लोपश् स्यादवे अवे किं भोस्तपस्विनः स्वरे यत्वं वा भोस् भगोस् अघोसां विसर्गस्य यत्वं भवति स्वरे पक्षे लोप
श् नामिनोरः नामिन् इति किम् रामो वंद्यः अवे किं अग्निः करोति ॥ छ छ वा छ

नमस्करोति नमः करोतीत्यत्र विकल्पेनसकार विसर्गौ निपातनात् पुरस्करोतीत्यत्र जिह्वामूलीयाभावः निष्प्रत्यूहं आविष्कृतं दुष्कृतमित्या
दौ विसर्गस्य षत्वं निपातनात् तिरस्कर्ता तिरःकर्तेत्यत्र विकल्पेन स कारविसर्गौ द्वौवारौ करोतीति द्विष्करोति द्विः करोति त्रीन् वारान्करोतीति
त्रिष्करोति त्रिः करोति चतुरोवारान् करोति चतुष्करोति चतुः करोति द्वित्रिचतुर्भ्यइति सुः चतुर्षु कपालेषु संस्कृत इत्यर्थे अण् द्विगुसमासेऽणो
लुक् च चतुष्कपालः चतुः कपालः सर्पिष्करोति सर्पिः करोति धनुः करोति धनुष्करोति इत्यादौ विकल्पेन विसर्गस्य षत्व विसर्गौ निपातनात्
सर्पिषो घृतस्य कुंडिकेति सर्पिष्कुंडिका नित्यं षत्वमत्र अयसः कार इत्ययस्कारः अयसः कुंभ इत्ययस्कुंभः इत्यत्र विसर्गस्य जिह्वामूलीयाभावः

नमस्करोति पुरस्करोति निष्प्रत्यूहम् आविष्कृतम् तिरस्कर्ता द्विष्करोति द्विः करोति त्रिष्करोति त्रिः करोति चतुष्क
रोति चतुः करोति चतुष्कपालं सर्पिष्करोति सर्पिः करोति धनुष्करोति धनुः करोति सर्पिष्कुण्डिका सर्पिः कुण्डिका अय
स्कारः अयस्कामः अयस्कुम्भः अयस्पात्रं अयस्संहिता कुशा अयस्कुशा अयस्कर्णी अधस्पदम् शिरस्पदम् आकृ
तिगणोयम् अविहितलक्षणस्सकारोवाचस्पत्यादिषु द्रष्टव्यः रोऽरात्रिषु अन्हो विसर्जनीयस्य पदान्ते रो भवति नतु
रात्र्यादिषु अहर्गणः अहरहः अरात्रिषु किं ॥ ॥

अयसः पात्रमित्ययस्पात्र मित्यत्रोपध्मानीयाभावः अयः संहिता कुशेत्ययस्कुशा वेदे औदुंबर शंकुं कुशेति व्यवहरंति अयोविकारे तु कुशी
ति अय इव कर्णौ यस्याः सा अयस्कर्णी नासिकोदरेतीप् अत्र जिह्वामूलीयाभावः पदस्याध इत्यधस्पदं शिरसापदमिति शिरस्पद मित्यत्रोपध्मानी
याभावः आकृत्या स्वरूपेण गण्यते यः स आकृतिगण इति रोऽरात्रिषु पदांते अहन् शब्दस्य विसर्गस्य रः स्यात् रात्र्यादिवर्जितेषु परतः रात्रिष्विति
बहुवचनमादिशब्दार्थे तेन रात्रि रात्र रूपरथंतराणि रात्र्यादयः अन्हां गण इत्यहर्गणः अन्ह इति नस्य सः अहः अहः इत्यहरहः वीप्सायां द्वि
त्वं अहश्च रात्रिश्चानयोः समाहारः ॥ छ ॥ छ छ छ

शसेवा शसे परे विसर्जनीयस्य विसर्जनीय एव वा भवति पक्षे सः कस् शूरः श्रुत्वं कश्शूरः कः षंढः कस् षंढः ष्टुत्वं कष्षंढः खपपरे शसे वि-
सर्गस्य लोपो वा खपः परो यस्मात्सः खपपरः तस्मिन्खपपरे शसे विसर्जनीयस्य लोपो वा भवति वाग्रहणात्पक्षे शसे वेति विसर्गे सत्वे चत्वे रू-
प्यं हरिस्फुरति हरिः स्फुरति हरिस् स्फुरति वाचस्पत्यादयो निपातात्सिध्यंति सिद्धस्वरूपोच्चारणं निपातस्तस्मादेते शब्दाः सिद्धिं यांति वाचः
पतिरित्यत्र षष्ठ्या अलुक् निपातनाद्विसर्गस्य सत्वं वाचस्पतिः तत् चौर्यं करोतीति तकारस्य सत्वं निपातनात् तस्करः बृहतां पतिरिति निपातना
त् तकारस्य सत्वं बृहस्पतिः कुतः कुत आगत इत्यत्र तत आगत इत्यनेनाव्ययात्त्यप् प्रत्यये प्राप्ते गणपाठसामर्थ्यादण्प्रत्यये टिलोपश्च निपातनाद्विस
र्गस्य जिह्वामूलीयाभावः कौतस्कुतः कान्कानिति अत्र एकः किंशब्दः प्रश्ने द्वितीयो निंदार्थे सगागमाभावोत्र भिन्नार्थत्वात् गणेचाम्रेडित

शसेवा कश्शूरः कः शूरः कष्षण्ढः कः षंढः कस्साधुः कः साधुः खपपरे शसे विसर्गस्य लोपो वा हरिस्फुरति हरिः
स्फुरति हरिस्स्फुरति कुप्वोः ≍क≍पौ वा क≍ करोति कः करोति कः पचति क≍ पचति वाचस्पत्यादयो निपातात्सिध्यं
ति वाचस्पतिः बृहस्पतिः तस्करः कौतस्कुतः कान्कान् कांस्कान् कस्कः भास्करः पयस्पाशं यशस्कल्पम् यशस्कम् य
शस्काम्यति सर्पिष्पाशं सर्पिष्कल्पम् सर्पिष्कम् सर्पिष्काम्यति ॥ ॥

स्यैव ग्रहणं कान् कुत्सितान् पश्य सीत्यर्थः कांस्कान् इति अत्र आम्रेडितत्वात्तु पूर्वनकारस्य सगागमो भवति निपातनात् कांस्कान् कान् कान्
पश्यतीत्यर्थः कः क इति कस्कः जिह्वामूलीयाभावोत्र भासः करोतीति भास्करः जिह्वामूलीयाभावः कुत्सितं पय इति पयस्पाशं कुत्सायामि-
ति पाशः ईषन्न्यूनं यश इति यशस्कल्पं ईषदसमाप्ताविति कल्पः कुत्सितं यश इति कुत्सिते थेकः यशस्कं आत्मनो यश इच्छतीति काम्यश्चेति का
म्यप्रत्ययः यशस्काम्यति इत्यादौ विसर्गस्य जिह्वामूलीयोपध्मानीयाभावो निपातनात् कुत्सितं सर्पिरिति सर्पिष्पाशं ईषन्न्यूनं सर्पिरिति सर्पि १६
ष्कल्पम् कुत्सितं सर्पिरिति सर्पिष्कं आत्मनः सर्पिरिच्छतीति सर्पिष्काम्यति इत्यादौ विसर्गस्य षत्वं निपातनात् ॥ ॥ ॥

शसे ङ्णोः कुक् टुकौ वा ङकारणकारयोः कुक् टुक् आगमौ वा स्तः शसे परे कुगभावे प्राङ् षष्ठः कुगागमे प्राङ्क्षष्ठः कुक्को द्वितीये प्रा
ङ्खषष्ठः पकारपरे नॄन् नकारस्य नॄ स वा नित्यस्य नकारस्य नस् आदेशः स्याद्वा पकारे परे अकार उच्चारणार्थः तेन नॄः पुनाति इत्यादि सिद्ध
तिः स्रोर्विसर्गः स च र् च स्रौ तयोः स्रोः पदांते स्रोर्विसर्गः स्यात् धात्वधातुसाधारणमिद अधातोः रसे पदांते च अधातोः स्रोर्विसर्गः स्याद्रसे प
रे पदांते च पदांते किम् स्यात् ब्रूयात् पयसी वारि रसे किं चातुर्यसुप्प्रत्यये परे रस्य विसर्गो न चतुर्षीति निर्देशात् तेन गीर्षु वार्षु पूर्षु इत्या
दिसिद्ध्यति नार्पत्यः भार्गवः इत्यादौ तु बहिरंगाया वृद्धेरसिद्धत्वान्न विसर्गः वर्ष्मवर्त्मेत्यादौ कर्तृसाधनयोरिति निर्देशान्न विसर्गः ॥ कुप्वोः ᳲ
क ᳲ पौ वा आदेशनिमित्तयोर्यथाक्रमम् अत्रास्ति आदेशे ककार पकारावुच्चारणार्थौ केवलयोर्जिह्वामूलीयोपध्मानीययोरुच्चारणासंभवा

शसे ङ्णोः कुक् टुकौ वा प्राङ् षष्ठः प्राङ्क्षष्ठः प्राङ्खषष्ठः सुगण् साधुः सुगण्ट्साधुः सुगण्ठ्साधुः पकारे परे नॄन्
नकारस्य नॄ स वा स्रोर्विसर्गः सकाररेफयोर्विसर्गो भवति अधातोः रसे पदांते च कुप्वोः ᳲ क ᳲ पौ वा कवर्गपवर्गसंबंधि-
नि खसे परे विसर्गस्य ᳲ क ᳲ पौ भवतः कपावुच्चारणार्थौ नॄᳲ पाहि नॄः पाहि नॄन् पाहि इति ह स संधिः विसर्जनीयस्य सः
खसे परे कस्तनोति शसपरे खसे विसर्जनीयस्य विसर्ग एव कः त्सरुः घनाघनः क्षोभणः ॥ ॥ न् किंच ककार खकारयोः

परतः ᳲ कः स्यात् पकारफकारयोश्च ᳲ पः स्यात् कुप्वोरिति किं कश्चारः वाग्रहणात् पक्षे विसर्गः विसर्जनीयस्य स इत्यस्यापवादोऽयम् उपध्मा
नीये नॄᳲ पाहि विसर्गे नॄः पाहि नॄन्पाहि इति ह स संधिः विसर्जनीयस्य सः विसर्गस्य सकारः स्यात् खसे परे कस्तनोतीत्यत्र विसर्गस्य स
त्वे कृते तस्य पुनर्विसर्गादेशो न असिद्धत्वाद्विधिसामर्थ्याद्वा शसपरे खसे विसर्जनीयस्य विसर्ग एव शसः परो यस्मात् स शसपरस्तस्मिन् श
सपरे खसे विसर्जनीयस्य विसर्जनीय एव भवति न त्वन्यत् यदि तु शसपरे खसे नेत्येवोच्येत तर्हि प्रकृते सत्वे निषिद्धेऽपि ᳲ क ᳲ पौ स्यातामपि वि
सर्गवचनात्तु विकारमात्रमपि निषिध्यते तेन वासः क्षौमं अद्भिः प्सातमित्यादौ विसर्ग एव ॥ ॥ छ छ छ

ढुमोनुस्वारे परे परसवर्णेन णः कुण्ठितः शमुउपशमे क्तः दांतादयोवा निपात्यंतेइति निपातनादिड भावः अमांतस्योपधायादीर्घः क्वाविति दीर्घः मस्यानुस्वारे परसवर्णेन नकारः शान्तः गुंफ ग्रंथे क्तः मस्यानुस्वारे परसवर्णेन मः गुम्फितः ननु कुर्वन्तीत्यत्रानेन कृतस्य नस्य णत्वं कस्मान्न उच्यते असिद्धं बहिरंगमंतरंगे इति परसवर्णस्यासिद्धत्वान्न णत्वं ॥ ७८ ॥ वापदांतस्य अत्रानुस्वारस्यानुनासिका एव यमावास्युः मोराजिसमः क्वौ क्विबंते राजतौ परे समो मस्य म एव मकारस्य मकारं वचन मनुस्वार निवृत्त्यर्थं राजतौ किं गमादीनां च मस्येति मलोपे ह्रस्वस्येति तुक् संपत् सम इति किं इदं राट् क्विबंते इति किं संराजितव्यं संराजते इति राजृ दीप्तौ संपूर्वादस्मा द्वर्तमाने क्विप् षत्वडत्वचर्त्वानि सम्राट् यवल मनपरे ह कारे मस्य यवल

वापदांतस्य पदांते वर्तमानस्यानुस्वारस्य यमावा भवंति यपे परे अस्य यपस्य सवर्णाः त्वङ्करोषि त्वंकरोषि तन्तनोः ति तं तनोति संय्यन्ता संयंता संव्वत्सरः संवत्सरः यँल्लोकम् यंलोकम् मोराजिसमः क्वौ क्विबंते राजतौ परे समो मस्य म एव स्यात् सम्राट् यवल मनपरे ह कारे मस्य यवल मनावा किंय्ह्यः कियह्यः किंव्ह्वलयति किंह्वलयति किंल्ह्लादयति किंल्ह्लादयति किम् ह्मलयति किन्ह्नुते किंह्नुते शसेचपस्य द्वितीयावा वथ्सरः वत्सरः अफ्सरः अप्सरः नपदांतेत त्साधुः कुकुडुकु वर्जितस्याधिभक्तौ न भवत्सु टनात्सस्य वा धुट् षट्त्सन्तः षट्संतः सन्त्सः सन्सः ॥ ७९ ॥

मनावायश्च वश्च लश्च मश्च नश्च ते यवलमनाः यवलमनाः परे यस्मात् सः यवलमनपरस्तस्मिन् यवलमनपरे हकारे मस्य यवल मना वा भवंति ह्वल ह्मल संचल ने ह्नुङ् अपनयने शसे चपस्य द्वितीयावा वर्गप्रथमानां द्वितीया भवंति शसे परे नपदांते पदांते स्थितानां वर्गप्रथमानां द्वितीया न भवंति कुकुडुकु वर्जितस्य विभक्तौ न चपस्या विभक्तौ द्वितीया न स्युः कुकुडुकोश्च द्वितीयाः स्युर्विभक्तौ परे टनात्सस्य वा धुट् टश्च नश्च तयोः समाहारः टनं तस्मात् टकार नकारा- भ्यां परस्य सकारस्य धुट् वा स्यात् धुटः श्चपत्वे न तकारः ततः शसे चपस्येत्यनेन तकारस्य थो न चपत्वस्यासिद्धत्वात् षट्त्संतः ॥ ८० ॥ ॥ १५

पदांताद्दीर्घाद्वा पदांतात्दीर्घात्परश्छोवाद्दिः स्यात् आङ्माङ्भ्यांनित्यं पदांताद्दीर्घादित्यस्यापवादोयं आङ्माङ्भ्यांपरश्छोद्विः स्यान्नि
त्यं पुंसोऽवपरेखपेसंयोगांतस्यलोपोनभवति अवः परोयस्मात्सअवपरस्तस्मिन् अवपरे खपेसंयोगांतस्यलोपइति प्राप्तावयंनिषेधः अव
परेकिं पुंक्षीरं सलोपोत्रखपे किं पुंदासः अत्रापिसलोपः ख्याधातौवापुंसशब्दस्यसकारस्यलोपोवाभवति चक्षिङः ख्याञ् इतिख्याधातौपरेपुं
ख्यानमितिचक्षिङोयुदिरूपम् मोनुस्वारः पदांतइत्यनुवर्तते पदांतेमोनुस्वारः स्यात् हसेपरे पदांतेकिं गम्यते मइतिकिं भवान्हसति हसेकिंफलम-
स्तिमइत्यत्राकारउच्चारणार्थः अनुस्वारइतिपूर्वाचार्याणांसंज्ञानश्चापदांतेझसे चकारोमकारस्यसमुच्चयार्थः अपदांतेनस्यमस्यचानुस्वारः

पदांताद्दीर्घाद्वा लक्ष्मीछाया लक्ष्मीच्छाया आङ्माङ्भ्यांनित्यम् आच्छादयति माच्छिदत् पुंसोऽवपरेखपेसंयोगांत
स्यलोपोन पुंस्कोकिलः पुंस्पुत्रः अवपरेकिम् पुङ्क्षीरम् खपेकिं पुन्दासः ख्याधातौवा पुंख्यानम् पुङ्ख्यानम् मोनुस्वारः म
कारस्यानुस्वारोभवतिहसेपदांते तंहसति पटुंवृथा पदांतेकिं गम्यते हसेकिं किमत्र नश्चापदांतेझसे नस्यमस्यचापदां
तेवर्तमानस्यानुस्वारोभवतिझसेहकारेचपरे यशांसिपुंभ्यांस्वनडुांहि अपदांतेकिं ब्रह्मन्पाहि झसेकिं तन्यते यमायपे-
स्यअपदांतेवर्तमानस्यानुस्वारस्य यमाभवंतियपेपरे अस्ययपस्यसंवर्णाः शान्तः अङ्कितः अञ्चितः कुण्ठितः गुम्फितः

ष्यात् झसेपरे अपदांतेकिं भवान् भाति झसेकिं मन्यते यम्यते यमायपेस्यअस्येतियपपरामर्शार्थं अनुस्वारस्यानुवृत्तेर्बलाभात् अपदांते
अनुस्वारस्य यमाभवंतियपेपरेतेयमा अस्ययपस्य सवर्णाभवंतीत्यर्थः सानुनासिकस्यानुस्वारस्य सानुनासिका एव यमाः स्युः य
माइति बहुवचनं जातौज्ञेयं कुंडं रथेन त्यत्रानुस्वारस्य पाक्षिकोयमोन रकारस्यानुनासिकत्वाभावात् यपेकिं आक्रंस्यते स्वनडुांहि अनु
स्वारस्येति किं राजन्गच्छ गम्यते अंकपदेलक्षणेचेति चुरादिर्ण्यंता तृक्तः सेटोः क्तक्तवत्वोर्णिलोप इति णेर्लोपः अनेनानुस्वारस्यङः अकि
लक्षणइत्यस्माद्धा क्तः नुमोनुस्वारेपरसवर्णेनिङः अङ्कितः अंचेः पूजायामिडितीट् पूजार्थस्यांचतेर्नेतिनलोपोन अंचितः कुठिप्रतिघाते क्तः

शेचक्वान इत्यनुवर्ततेनांतस्य पदस्य पंचकस्याद्वा शेपदस्येति किं दंशः शेइति किं भवांश्चिनोति चक्वा इत्यत्र वाक्येस्ता विवक्षामपेक्षते इ
त्युक्तत्वाज्जबाभावः भवान् शूरइत्यत्र च गागमस्य कित्वात् पूर्वांतत्वेन चपाच्छः शाइति च्छत्वविकल्पः पक्षेहसासरस्य झसस्येति चलोपः
नकारस्यानुस्वारपरसवर्णौ अपदांतत्वात् भवाञ्छूरः भवाञ्च्छूरः भवाञ्च्शूरः भवाञ्शूरः अछौ अचछा अचशा अशाविति चतुष्टयं रू
पाणामिह चकृ छत्व चलोपानां विकल्पनात् कुर्वंस्तिष्ठ कुर्वंश्च छेते इत्यत्राऽपदांतनकारस्य स्थानेऽनुस्वारश्चुत्वाभ्यां परत्वात्प्राप्तं णत्वं न कस्मात् अ
सिद्धं बहिरंगमंतरंगे इति परिभाषया बहिरंगयोः सकृचकोरसिद्धत्वात् अनंते इत्यंतरंगेण णत्वनिषेधे सति तच्छास्त्रं स भृशंभ्रुरित्यादौ चोः कुरिति
कुत्वमपि न अंतरंगे कुत्वे कर्तव्ये श्चुत्व चकोरासिद्धत्वात् कुत्वविधिस्तु वाग्म्यां वक्षतीत्यादावेकपदस्थे चवर्गे सावकाशः चपाच्छः शः अस्वयुक्ता

शे चकुवानां तस्य पदस्यावपरे शेवाच्च गागमो भवति भवाञ्छूरः भवाञ्च्छूरः भवाञ्चशूरः भवाञ्शूरः ङ्णनो
ह्रस्वाद्विः स्वरे ङकारणकारनकारा ह्रस्वादुत्तरा द्विर्भवंति स्वरे परे पदांते च प्रत्यङ्ङिदम् सुगण्णिह राजन्निह ह्रस्वा
त्किम् प्राङास्ते पदांते किं परमदण्डिनौ छः ह्रस्वात्सरश्छकारो द्विर्भवति खसे च पाझसानाम् तवच्छत्रं तवच्छत्रम् दी
र्घाच्च ह्रीच्छः ॥ ॥ च्छसादावित्यादि निर्देशात् ङ्णनो ह्रस्वाद्विः स्वरे ङ् च ण् च न् च ते ङ्णनः पदांते इत्यनुवर्तते ह्रस्वात्सराः पदांते
स्थिताः ङ्णनः द्विः स्युः स्वरे परे ह्रस्वादिति किं प्राङ् आस्ते प्राण् आस्ते भवान् आस्ते ङ्णन इति किम् आस्से स्वरे किं प्रत्यङ् करोति सुगण् वदति प
चन्वदति पदांते किं दंडिनौ ननु समिद्दडिनावित्यादौ पूर्वपदस्येव चोत्तरखंडस्यापि प्रत्ययलक्षणेन पदत्वात् नस्य द्वित्वं स्यात् उच्यते उत्तरखंड
स्य प्रत्ययलक्षणेन पदांतकार्यं न एदोतोतः वर्तिनावित्यादि निर्देशात् अत एव परमवाचौ परमगोदुहौ परमलिहावित्यादौ कुत्व धत्व दत्वादी
नि न भवंति ननु अनश्व इत्यादौ नस्य द्वित्वं स्यात् उच्यते अनंते अनपीत्यादि ज्ञापनान्न द्वित्वम् छः ह्रस्वादित्यनुवर्तते छकारे अकार उच्चारणार्थः ते
न विच्छिन्नमित्यादि सिध्यति खसे च पाझसानां च पास्य खसे परे झसानामिति किं खल्लु खसे किं वेच्चि दीर्घाच्च दीर्घात्सरश्छकारो द्विः स्यात् ॥

किम्

टवर्गान्त परस्य ॥२॥

नवतिनगर्योर्न पदांतात् टवर्गात्परयोर्नवतिनगरीशब्दयोः ष्टुत्वं भवति टोरंत्या दितिनिषेधो न प्रवर्तते इत्यर्थः षड्भिरधिका नवतिरित्यत्र षस्य ड त्वे कृते तस्य ष्टुत्वं ततः षण्णवतिः षट् नगर्य्यः इत्यत्र नस्य ष्टुत्वं षण्णगर्य्यः स्यादीनां सुपि ताबनटवर्गात्सरस्य स्यादीनां तकारस्य सकारस्य ष्टुत्वं न भवति [illegible] तोर्लि लः तोरिति किं शक्नोतीति शक्लुनातीति लि इति किं तदन्यं यकार वकार लकाराः सानुनासिका निरनुनासि काश्च तत्र सानुनासिकस्य नकारस्य स्थाने सानुनासिक एव लो भवतीत्यर्थः उदस्थास्तंभोः सलोपः उदः परयोः स्थास्तंभोः सकारस्य लोपो भवति- ष्ठागाति निवृत्तौ स्तंभु निरोधने सलोपे कृते खसे च पाङ्ससानामिति दस्य तः उत्थानं नः सक् छते नांतस्य पदस्य सक् स्यात् अवः परो यस्मात् सः अवपरस्तस्मिन् अवपरे छते किं वादं ते सको ऽकारस्तूच्चारणार्थः कस्यांते इत्याकांक्षायाम् पदस्यांते भवति नस्यापदांतत्वान्न श्चापदांते झसेइ

नवतिनगर्योर्न षण्णवतिः षण्णगर्यः सुपो न लिट्सु द्वनात्सस्य वा ष्टुट् लिट्सुः तोर्लि लः तवर्गस्य लकारे परे लका रः स्यात् तल्लुनाति भवांल्लिखति अनुनासिकाननुनासिकत्वेन द्विधा यवलास्तत्र नकारस्यानुनासिको लकारः उदः स्थास्तंभोस्सलोपः उत्थानम् उत्तंभनम् नः सक् छते नांतस्य पदस्या वपरे छते सगागमो भवति राजंश्छित्रम् भवांस्त नोति अवपरे किम् सन्त्सरुः न प्रशानः प्रशान्तनोति ॥ ॥

त्वनुस्वारः नस्य सगागमो भवतीति वचने तु नस्यानुस्वारो न स्यात् स कोनकारस्य भक्तत्वात् तस्य पदांतत्वा ऽनपायात् आगमा ष्टि किंतु मितस्ते यस्य गुणीभूता यद्गुणीभूताः यस्य विशेषणी कृतास्तद्ग्रहणेना वि शेष्यग्रहणेन कृत्वा ते आगमाः आचार्यैर्गृह्यंते अभ्युपगम्यंते तद्यथा सगागमः पदस्य विहितः पदं विशेष्यं सगागमो विशेषणं पदग्रहणेन सक् गृह्यते सक् पर्यंतं पदमित्यर्थः पदस्येति किं हंति नांतस्येति किं तद्दीकते छते किं भगवन् कुरु अवपरे छते किं सन्त्सरुः रवड्गसुधिः न प्रशा नः प्रशानिति नांतस्य पदस्य सग् न भवत्यवपरे छते प्रपूर्वात् शाम्यतेः क्विप् म्नमांतस्योपधाया दीर्घ इत्यनेन दीर्घः मो नो धातोरिति नः नस्यासिद्धत्वान्न लोपो न प्रशाम्यतीति प्रशान् ॥ छ छ छ छ

तस्यस्तोः शाकपार्थिवादित्वान्मध्यमपदलोपः श्च चवश्च श्चवस्तैश्चुभिः श्चुरितिपुल्लिंग निर्देशोयमित्येके नपुंसक निर्देशोयमित्यन्ये श्चुभिरि
तिसहादियोगेविनापिसहार्थे तृतीया सिनेतिनिर्देशात् अत्रस्थान्या देशयोर्यथासंख्य मस्ति निमित्तस्थानिनोस्तु न यथा संख्यं नशादितिज्ञाप
कात् उद्दिश्यतेइति उद्दिश्यमानः स्थानीनिर्दिश्यते विधीयतेयः सनिर्दिश्यमानः आदेशस्तयोर्यथाक्रमं यथासंख्यंवक्तव्यं न्चवर्गयोगेकश्चरतीति
कश्शूर इत्यत्रशसे नेत्यस्य पाक्षिकत्वाद्विसर्जनीयस्य सस्तस्य शकारेण योगेशः तच्चित्रमित्यत्रचवर्गयोगे तवर्गस्यचुत्वं तच्शिवइत्यत्रशकारेणयोगेतो
श्चुत्वम् नशात् स्तोः श्चुरित्यनुवर्तते शात्परस्यसस्यशाकारप्रसंगोनास्त्यतः शात्परस्यतोश्चुत्वंन प्रच्छज्ञीप्सायां विच्छगतौ आभ्यांनङ्कीति नङ् प्रत्ययःङ्कि
तिझसेक्कौअमेचेति छस्यशत्वं नङोङित्वाद्गुणाभावः प्रच्छेस्तु संप्रसारणं नभाष्ये ऽनुक्तत्वात् ष्टुभिः ष्टु स्तोरित्यनुवर्तते ष् च टवश्च ष्टवस्तैः ष्टुभिः

उद्दिश्यमानप्रतिनिर्दिश्यमानयोर्यथाक्रममितिवाच्यम् कश्चरति कश्शूरः तच्चित्रम् तच्छादयति नशात्
शकारात्परस्य तवर्गस्यचुत्वंनभवति प्रश्नः विश्नः ष्टुनाष्टुः सकारतवर्गयोः षकारटवर्गाभ्यांयोगेषकारटवर्गौभ
वतः कष्षष्ठः तट्टिकतेनाविषकारेपरे तवर्गस्यटुत्वंनभवति भवान्षष्ठः टोरंत्यात् पदांते वर्तमानाट्टवर्गात्परस्यस्तोष्टुर्नभव-
ति षण्नरः षड्नरः षट्सीदंति ॥ ॥

ष् च टुश्चानयोः समाहारः ष्टु नपुंसकनिर्देशोयमित्येके षा सहितः टुः ष्टुः शाकपार्थिवादित्वा-
न्मध्यमपदलोपः इतिपुल्लिंगनिर्देशोयमित्यन्ये इहापिस्थान्यादेशयोर्यथासंख्यं निमित्तस्थानिनोस्तु ननषीतिनिषेधात् स्तोः ष्टुभिर्योगेष्टुः स्यादि-
तिः नषिनोष्टुर्नस्यात् षकारेपरे तोरितिकिं कष्षष्ठः षीति किं तट्टीका षीतिसप्तमीनिर्देशात्पूर्वेषकारेष्टुत्वंस्यादेव रोष्टेति टोरंत्यात् स्तोरित्यनुव
र्तते अंतेभवोंऽत्यस्तस्मादंत्यात् अंत्यशब्देनपदांतंकथ्यते भवार्थेण्यः णितोवेति णित्वविकल्पाद्वृद्ध्यभावः पदांते स्थिताट्टोः परस्य स्तोष्टुत्वं
नभवति पदांतात् टोः किं ईट्टे टोः किं सर्पिष्टमं अमेअमावेतिअमेषण्नरः जबभावपक्षे षड्नरः इतिबहुवचनम् ॥ ॥ १३

झपाअवेजशाः पदांतेइत्यनुवर्ततेपदांतेवर्गप्रथमास्तृतीयाभवंत्यवेपरेपदांतेकिंवाचौ भवंतौ बहुवचनंसर्वव्यक्तिषुतात्पर्यबोधनार्थम् ॥ञमेञमावापदा
न्तेइत्यनुवर्तते पदांते वर्गप्रथमाः पंचमाःस्युः पंचमे परेपदांते किं वञ्मि पाप्मा यलः पक्षेतृतीयाश्चपा अवेजबाइत्यनेनैव प्रत्ययेञमेजबस्यापिनित्य
म् वर्गतृतीयानांपंचमाभवंतिप्रत्ययसंबधिनिञमे परेअपिशब्दाद्वर्गप्रथमानामपि कथंतर्हिरघुकाव्ये मदोदग्राः ककुद्मंत इतिउच्यतेयवादिगणे
दकारस्यनिपातनान्मयमोभवतीतिकौमुदी क्वचिज्जबस्यापि अमोभवति तन्मदेकत्वेइतिज्ञापकात् तत्स्वरूपमस्येति तन्मयं प्राचुर्यविकारप्राधान्या-
दिष्विति मयट् चित्प्रमाणमस्येति चिन्मात्रंप्रमाणे द्वयसट् दघ्नट् मात्रट् इति मात्रट्॥ चपाच्छःशः चपादुत्तरःशकारः छकारोवाभवत्यवेपरे चपादिति किं

चपा अवेजबाः पदान्तेवर्तमानाश्चपाजबाभवंति अवे परे षडत्रवाग्यथा ञमेञमावा पदान्तेवर्तमानाश्चपा ञमेपरेञ
मावाभवंति षण्मम षड्मम वाङ्मधुरा वाग्मधुराप्रत्ययेञमेजबस्यापि नित्यम् तन्मयम् चिन्मात्रम् चपा च्छःशः
पदांतेवर्तमानाच्च पादुत्तरस्यशकारस्यछोवाभवत्यवेपरेवाँक्छूरःवाक्शूरः अवे किम् वाक् श्च्योतति होझभाः चपादुर
त्तरस्य हकारस्यझभावाभवंति यद्वर्गगश्चपस्तद्वर्गगश्चतुर्थो भवति तद्धविः तद्हविः वाग्घरिः वाग्हरिः
स्तोः श्चुभिः श्चुःसकारतवर्गयोः शकारचवर्गाभ्यां योगेशकारचवर्गौ भवतः ॥ ॥

म् प्रशान् शेतेअवेइति किम्वाक् श्च्योतति शः किंवाक् साधुः ननु चपाच्छःशः इत्युक्तेसंदेहोभवति किं शस्यछः छस्य शोवेति लोकाच्छेष
स्येति निर्देशान्न संदेहमिति होझभाः चपाच्छःशः इत्यतश्चपादित्यनुवर्तते चपात्परस्य हस्यस्थाने जबाःस्युर्वानिमित्तादेशयोश्चपझभयोःस
मसंख्ययोर्यथाक्रमं वक्ति यद्वर्गगश्चपस्तद्वर्गगश्चतुर्थोभवतीति चात्परस्य हस्य झःटात्परस्य हस्य ढः तात्परस्य हस्य धः कात्परस्य हस्य घः पात्पर
स्य हस्य भः इति चपादितिकिं भगवन् हरे हस्येति किं तत् षष्ठं वाग्घरिः वर्गचतुर्थाभावेवाग्हरिः उभयत्र जबत्वंस्तोः श्चुभिः श्चुः स चतुश्चान-
योः समाहारस्तु तस्यस्तोः आगमः समनित्यमित्युक्तत्वान्नतुम् अथवा सासहितः तुःस्तुः ॥ . ७ ७

सिं॰च
१२

अपाद्दुओवो वास्वरे अपादरस्य उञ् निपातस्य वोवा स्यात्स्वरे परे किमु उक्तं वत्वपक्षे कंस्वुक्तं वस्यासिद्धत्वान्नानुस्वारोत्र दूरादाह्वा
नेटेःप्लुतः दूरत्वमिहाह्वा नापेक्ष्यं बोध्यंतेन देशापेक्षं पुरुषापेक्षं चन गृह्यते आह्वानेइतिसंबोधनमात्रोपलक्षणं तेनाह्वानादन्यत्रापिभवति
सक्तून्पिबदेवदत्त इति आह्वाने इत्याधारे सप्तमीआधारश्चाधेयमपेक्षते आधेयंचवाक्यमेव तेनैवाह्वानसंभवात् संबोधने वाक्यस्यटेःप्लुतः
स्यादित्यर्थः ह्रस्वदीर्घव्यक्ते रुच्चारणात्स्वरूपलिखनाच्च भानंप्लुतव्यक्ते रुच्चारणादेव हैहेप्रयोगेहैहयोःप्लुतोवाहैहेप्रयोगे दूरात्संबोधनेयद्वाक्यं
तत्र हैहयोरेवप्लुतो वास्यात् प्लुताभावेआय् हायंव हयीशेत्यत्र अय् सप्तम्यर्थेई इत्संधिंनयाति सप्तम्यर्थेसं सिद्धमीकारांतं पदंसंधिंन प्राप्नोतिअ

अपादुओवोवास्वरे किम्वुक्तम् किमु उक्त मूदूरादाह्वानेटेःप्लुतः दूरात्संबोधनेयद्वाक्यं तस्यटेःप्लुतौ[illegible] प्लुतः संधिंनप्रा
प्लुतः १
प्नोति एहिदेवदत्त ३ अत्राधीश हैहेप्रयोगे हैहयोःप्लुतोवा हैअम्बहायम्ब हे ईश हयीश सप्तम्यर्थेइत् संधिंनयातिवा
तप्तमी आस्तेयथी इदम् पपीएषः इतौवाउञ् उ इति विति अप्लुतवदिनौदेवदत्तेति गुरोरनृतो ऽनंत्यस्यापिवापर्यायेणप्लु
तः दे ३ वदत्त देवद ३ त्त अपिशब्दादंत्यस्या प्यगुरोर्वापर्यायेणप्लुतः देवदत्त ३ गुरोः किम् वकारादकारस्य माभूत् अनृतः किं
म् कृष्णा ३ गौश्चरति इति प्रकृतिभावः ॥ ॥ भवति १

थे ग्रहणा त्समासे माभूत् वाप्या मश्वोवाप्यश्व इत्यत्र वापीशब्दो वाप्यधिकरणक
द्रव्ये उपसंक्रांतो नतुसप्तम्यर्थे वातप्तमी यथी पपीशब्दा औणादिक ईकारांताः संति तेषां सप्तम्ये कवचनेन सवर्णदीर्घरूपम् ॥इतौवाउञ्
उञ्निपातः संधिंवाप्राप्नोति इतिशब्दे परे औनिपात इतिनित्यं प्राप्ते विकल्पोयम् अप्लुतवदितौ प्लुतो ऽप्लुतवद्भवति इतिशब्दे परे अप्लुतवत्का
र्यंयत्वादिकं करोतीत्यर्थः गुरोरनृतोनंत्यस्यापिवापर्यायेणप्लुतः दूरात्संबोधने यद्वाक्यं तस्यऋद्भिन्नस्यानंत्यस्यापिगुरोर्वापर्यायेणानुक्रमेणप्लुतः
स्यात् एकत्रदे इत्येकारस्य प्लुतता अन्यत्र द इत्यकारस्य प्लुतता त्त इत्यकारस्य तु दूरादाह्वानेटेः प्लुत इत्यनेन प्लुत संज्ञा प्रकृते र्मूलरूप
स्य भवनं प्रकृतिभावः ॥ ॥

टी॰सु॰
पू॰

१२

अकारो वासुदेवस्तस्य धौ अ इति रूपं अ आगच्छ आगच्छेति उः शंभुस्तस्य धौ ओ इति रूपं ओ आगच्छ अवागच्छेति इः कामस्तस्य धौ ए
इति रूपं ए आगच्छ अयागच्छेति स्वररूपनिपातस्य परेण स्वरेण सह संधिनिषेधोऽस्ति पूर्वेण स्वरेण सह तु संधिर्भवत्येव जानु उ अस्य रुजती
त्यत्र उकारोकारयोः सवर्णे दीर्घे कृते निपातस्याविकृतत्वात् परेणापि संधिर्भवत्येव जान्वस्येति ॥ ७ ॥ ओदंतो निपातश्च ओदंतो निपातः संधिं न प्राप्नो
ति निपातः किं देवोऽसि ओदंतो धावेतौ संबोधननिमित्तक ओकारः संधिं वा प्राप्नोति इति शब्दे परे इतौ किं पटोत्र धौ किं अहो इति प्रकृतिभावे वि-
ष्णो इति पक्षे अवादेशः व्योर्लोपशि इति वलोपे विष्ण इति पक्षे विष्णाविति ॠणामसवर्णे स्वरे समासे पदांते वा ह्रस्वः इश्च उश्च ॠ आ च ते ॠवरस्तेषां ॠणां
असमासे पदांते स्थितानामिवर्णो वर्ण ॠवर्णानां प्रकृतिभावो ह्रस्वश्च वा भवत्यसवर्णे स्वरे परे ह्रस्वपक्षे चक्रि अत्र प्रकृतिभावे चक्रि अत्र पक्षे यत्वं

ओदन्तो निपातश्च अहो ईशाः अहो आगताः ओदन्तो धौ वेतौ विष्णो इति विष्णा विति ॠणामसवर्णे स्वरेऽसमासे प
दान्ते वा ह्रस्वः चक्रि अत्र चक्रात्र मधु एतत् मध्वेतत् कर्तृ इदम् कर्त्रिदम् ह्रस्वविधानसामर्थ्यान्न संधिः समासे तु हर्य्यर्थः
पदान्ते किम् गौर्य्यौ पदांतानां समानानामृति ॡति च वा ह्रस्वः ब्रह्म ऋषिः ब्रह्मर्षिः दण्डि ऋषिः दण्ड्यृषिः वधु ऋकारः
वध्वृकारः होतृ ऋकारः होतृॡकारः होतृकारः पदांतानां किम् आर्च्छत् ॥

चक्र्यत्र इह स्कोरिति कस्य लोपो न यत्वस्य बहिरंगपरि
भाषयाऽसिद्धत्वात् स्थानिवद्भावाच्च हरेरर्थमिति हर्य्यर्थः समासत्वादत्र ह्रस्वप्रकृतिभावौ न पदांतानां समानानामृति ॡति च वा ह्रस्वः पदांते
स्थितानां समानानां प्रकृतिभावो ह्रस्वश्च वा भवति ऋकारे ॡकारे च परे होतृ ॡकारः ब्रह्म ऋषिरित्यादौ प्रकृतिभावार्थमिदं ॠणां तु पूर्वेणैव
प्रकृतिभावः सिद्ध्यति समासेप्ययं प्रकृतिभावोऽस्ति तेन सप्त ऋषीणां इति प्रकृतिभावे ब्रह्म ऋषिः संधौ ब्रह्मर्षिः पदांते किं ऊ[illegible]र्च्छदित्यत्र आ
इत्यस्य ह्रस्वो न ऋकारे परेपि पदांताभावात् ऋच्छ गत्यादावित्यस्य लङि तुदादेरित्यप्रत्यये दिवादाविडिति ॥ स्वरादेस्त्वाऽडागमयोश्च कृतयोरू
पं ॥ ७ ॥ ७ ७ ७ ७ ७

दयस्तु विभक्त्यर्था इति आदितो द्विकं प्रातिपदिकार्थ इत्यन्ये लिंगमात्रादिवाच्यमित्युक्तत्वात् तत्र स्वार्थो विशेषणं द्रव्यं विशेष्यं द्रव्यगुणक्रियासन्निधाने द्रव्यवाचकस्यैव प्राधान्यमित्युक्तत्वाल्लिंगं स्त्रीत्वादि संख्या एकत्वादि कारकं कर्मादि ॥ ६७ ॥ आमंत्रणे च संबोधने आधिक्ये प्राशीर्वचनं आमंत्र्यते अभिमुखः क्रियते अनेनेति करणे ल्युट् अनभिमुखोऽभिमुखः क्रियते अनेनेत्यभिमुखीकरणमनुकूलकरणं तत्र प्रथमा भवति देव मां पाहीति वाक्ये देवसंबंधि संबोधनविषयो मत्कर्मकरक्षणक्रियेति बोधः संबोधनपदं यच्च तत्क्रियायां विशेषणं इत्युक्तत्वादिह संबोधनं प्रकृत्यर्थं प्रति विशेष्यं क्रियां प्रति विशेषणमिति भोस् भगोस् अघोस् भवद्भगवदघवतां वा निपात्याधौ धिविषये एषां स्थाने एते निपात्यंते वा हे भोः हे भवन् हे पूज्येत्यर्थः हे भगोः हे भगवन् हे ज्ञानिन्नित्यर्थः हे अघोः हे अघवन् हे पापिष्ठेत्यर्थः भोस इत्यनेन विसर्गलोपः भो हरे इति प्रथमा शेषाः कार्यैकर्तृसाधनयोर्दानपात्रे विश्लेषावधौ संबंध आधारभावयोः

आमंत्रणे च अभिमुखीकरणे प्रथमा हे देव हे देवौ हे देवाः भोस् भगोस् अघोस् भवद्भगवदघवतां वा निपात्याधौ भो हरे भगो नमस्ते अघो याहि इति प्रथमा शेषाः कार्यैकर्तृधानयोर्दानपात्रे विश्लेषावधौ संबंधाधारभावयोः द्वितीयाद्या विभक्तय एष्वर्थेषु भवंति कार्ये कर्मकारके द्वितीया कटं करोति कारुकः रूपं पश्यति चाक्षुषः राज्यं प्राप्नोति धर्मिष्ठः सोमं स्कुनोति सोमपाः ॥ ॥

शिष्यंते इति शेषाः कर्मणि घञ् प्रत्ययः प्रथमायाः शेषाः अन्याः षड्विभक्तयस्ताः कार्यादिषु षट्सु यथाक्रमं प्रवर्तंते इत्यर्थः कार्ये द्वितीया क्रियते कर्त्रा स्वक्रियया निष्पाद्यते यत् कार्यं धातूपात्तफलाश्रयेत्यर्थः तस्मिन्ननुक्ते कार्ये कर्मणि द्वितीया स्यात् उक्ते कर्मणि तु प्रथमैव उक्तं त्वाख्यातकृत्तद्धितसमासनिपातैर्भवति आख्यातोक्ते हरिः सेव्यते कृदुक्ते लक्ष्म्या सेवितो हरिः तद्धितोक्ते शतेन क्रीतः शत्यः कारकात्क्रियायुक्ते इति शेषः समासोक्ते प्राप्त आनंदो यं स प्राप्तानंदः निपातोक्ते विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतमिति कटं करोति कारुकः रूपं पश्यति चाक्षुषः राज्यं प्राप्नोति धर्मिष्ठः सोमं सुनोति सोमपाः १ अत्र सर्वत्राख्यातेनानुक्ते कर्मणि द्वितीया कारुकः पुमान् कटं करोति कटनिष्ठोत्पत्त्यनुकूला एककर्तृका वर्तमाना करोति क्रियेति शाब्दबोधः चक्षुषा पश्यतीति चाक्षुषः पुमान् कारुका

नियतोपस्थितिकः नियतोपस्थितिर्यस्य स नियतोपस्थितिकः यस्मिन् नाम्नि उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स नियतोपस्थितिको नामार्थः
एव शक्य इत्युच्यते अनियतलिंगग्रहणार्थं लिंगमिति लिंगे लिंगमात्राधिक्येऽपि प्रथमा यद्यपि लिंगमात्र इत्येवाक्षरार्थस्तथाऽपि नामार्थं विना लिंगादिप्र
तीतेरसंभवादाधिक्ये इत्युक्तं प्रथमादयः ससम्यंताः प्राचां संज्ञास्ताभिरिहापि व्यवहारः ननु सिंहो माणवक इत्यादौ प्रथमा न स्यात् उच्यते शक्यार्थमादा
य प्रथमाविभक्तेरुत्पत्तौ सत्यां पश्चात् सदांतरसमभिहारो लक्ष्यार्थबोधोऽस्तीति ननु वीरः पुरुष इत्यादौ प्रथमा न स्यात् वीराऽभिन्नः पुरुष इत्यभेदसंसर्गस्याधि
कस्य भानात् उच्यते अत्र पदसंस्कारपक्षाभ्युपगमोऽस्ति ततोंतरंगत्वात् प्रथमप्रवृत्तपदसंस्कारेण प्रथमा रूपेऽकृते पश्चाद्बहिरंगत्वात् अभेदसंसर्गो वाक्यार्थः
कर्तव्य इति नास्ति लिंगं येषां ते अलिंगाः नियतं निश्चितं लिंगं येषां ते नियतलिंगा इति उभयेषां नामार्थमात्रे उदाहरणं यथा उच्चैरिह पदत्वाद्विसर्गसिद्धिः किंचास्य

नियतोपस्थितिको नामार्थः उच्चैः नीचैः कृष्णः श्रीः ज्ञानं द्रोणः खारी आढकं एकः द्वौ बहवः अलिंगा नित्यतलिंगाश्च नामार्थमात्र इ
त्यस्योदाहरणं अनियतलिंगास्तु लिंगमात्राधिका इत्यस्य तटः तटी तटं ॥ ॥

प्रथमां तत्वात् संग्रामउ-
च्चैस्तव संग्राम उच्चैस्ते इति विद्यमानपूर्वादिति सूत्रेण तेमे आदेशयोर्विकल्पसिद्धिरपि फलं कृष्णः अयं नीलद्रव्येऽनियतलिंगस्तथाऽपि वासुदेवे नियत-
लिंगः ज्ञायते तत्ज्ञानं भावे युट् खारी द्रोण आढकमित्यत्राऽपि नामार्थ एव प्रथमा परिमाणार्थस्य नियतज्ञानात् द्रोणो व्रीहिरित्यत्र तु द्रोणपरिच्छिन्नाऽभि
न्नो व्रीहिरित्यभेदान्वयः नामार्थयोरभेदान्वयस्य व्युत्पन्नत्वात् ननु एको द्वौ बहव इत्यत्र नाम्नैव संख्याया अभिधानात् प्रथमा न स्यात् उच्यते न केवला प्रकृ
तिः प्रयोक्तव्या नाऽपि केवलः प्रत्यय इति नियमात् प्रथमोत्पत्तिर्बोध्या अनियतं लिंगं येषां ते अनियतलिंगास्तेषामनियतलिंगमेवेति लिंगमात्रं अधिकस्य
भाव आधिक्यं लिंगमात्राधिक्यं तस्मिन् उदाहरणं बोध्यं किंच भाष्यकारमते पंचकः प्रातिपदिकार्थः स्वार्थ द्रव्य लिंग संख्या कारक इति यथा दधि मध्वित्यादौ
विनाऽपि विभक्तिं प्रातिपदिकादेव तावतामर्थानां प्रतीतेः कैय्यटमते आदितश्चतुष्कं प्रातिपदिकार्थः वृत्तिकारमते आदितस्त्रिकं प्रातिपदिकार्थः संख्या कर्मा

संहितशफलक्षणवामसहितसहादेरनौपम्येपिसंहितादिपूर्वपदादुरूत्तरपदान्नाम्नः स्त्रियामूःस्यात् उपमीयते अनयेत्युपमा तस्याभाव औप
म्यं न औपम्यं अनौपम्यं तास्मिन् संहितौ मिलितौ ऊरू यस्याः सासंहितोरूः शफाविव ऊरू यस्याः साशफोरूः शफंक्ली बेरखुरः पुमान्नित्यमरेण क्ली
बत्वमुक्तं तथाऽपिकोशांतरेपुंस्त्वं शफःखुरेगवादीनां मूले विटपिनामपीति हेमचंद्रः लक्षणमस्त्यस्मिन् सलक्षणः अस्त्यर्थे अप्रत्ययः लक्षणौ ऊ
रू यस्याः सालक्षणोरूः वामौस्कंदरौऊरू यस्याः सावामोरूः हितेन सह साहितौ सहितौ ऊरू यस्याः सासहितोरूः सहेतेइतिसहौ सहौ ऊरू य-
स्याः सासहोरूः नृनरयोर्वृद्धिश्च नृशब्दात् ऋणईबितिईपिप्राप्ते नरशब्दात् जातिलक्षणे ईपिप्राप्ते वृध्यर्थं वचनं नुर्नरस्य वास्त्रीनारीयूनस्तिः ऋणई
बित्यस्याऽपवादः नाम्नोनइतिसूत्रे केचित् स्यादौ रसेइत्यनुवर्तयंति तन्मते युवन् शब्दात्तिप्रत्यये नलोपः कथं स्यात् स्यादीनां रसस्य यत्वाभावात् उच्य

संहितशफलक्षणवामसहितसहादेरनौपम्येऽपिसंहितोरूः शफोरूः लक्षणोरूः वामोरूः सहितोरूः सहोरूः नृनरयोर्वृ
द्धिश्च नारीयूनस्तिः युवनशब्दात स्त्रियान्तिः युवतिः इतिस्त्रीप्रत्ययाः लिंगार्थे प्रथमानामार्थमात्रे लिंगमात्राधिक्ये च प्रथ
माविभक्तिः

ते तु इः इतिच्छेदः कर्तव्यः युवन् शब्दात्स्त्रियामीप् प्रत्ययो यूनोंत्यस्य तादेशश्चेति कथं तर्हि युवती करनिर्मथितामिति प्रयोगः यौति मिश्रीकरो-
तिपत्यासहेतियौते: शत्रंतात् ङ्गित इतिईपिकृते बोध्यः अत्रापि अनुपसर्जनादिति वक्तव्यं गौणे तु बहवो युवानो यस्यां बहुयुवाभूः स्त्रीप्रत्ययां तेभ्यः
शब्देभ्यः प्रातिपदिकग्रहणेलिंगविशिष्टस्यापि ग्रहणमिति परिभाषयास्या द्युसन्तिर्बोध्या अथ कारक प्रकरणं स्यादयः प्रत्ययानाम्नो विहितास्ते
षामर्थविशेषे व्यवस्थां दर्शयितु मारभते लिंगार्थे प्रथमा लिंगं च अर्थस्थानयोः समाहारो लिंगार्थं तस्मिन् लिंगार्थे अर्थे प्रथमे त्युक्तौ कस्यार्थे इत्याकांक्षा २
यां यस्मान्नाम्नः स्यादिर्विभक्तिर्विहिता तस्यनाम्नोर्थे एवेति नामार्थमात्रे मात्रं कार्त्स्न्येऽवधारणे इत्यमरः तत्र प्रथमा विभक्तिर्भवति सको नामार्थः
॥ छ ॥ छ छ छ छ छ छ

अक्त्यर्थात् किंभूतिः क्तिरिति स्त्रियां भावे ऽर्थेक्तिः आक्रोशे नञ्यनिरिति जनेरनिप्रत्ययः न जायतेइत्यजननिः पद्धत्यादिभ्यो वा स्त्रियामेभ्यो
वेपृस्यात् पद्भ्यांहन्यते इतिपद्धतिर्मार्गः क्तिप्रत्ययांतत्वादप्राप्ते विध्यर्थं पद्धतिशब्दोगणे पठ्यते पद्धतिषष्टिविकटविशालकल्याणपुराणचंडकृपाण-
अहस्मित्यादयः ऐचमन्वादेः मनुरादिरस्यसमन्वादिस्तस्मान्मन्वादेः आदिशब्दः प्रकारे स्त्रियां मन्वादेर्ङीप्स्यात् पुंयोगे एषामंतस्यैकारादेशश्च पूतः
क्रतुर्यस्ययेनवा पूतक्रतुः पूतक्रतोः स्त्री पूतक्रतायी पुंयोगे किं पूतक्रतुः स्त्रीययातु क्रतवः पूताः स्यात् पूतक्रतुरेवसेत्यमरः अग्नेः स्त्री अग्नायी अथाग्न
यीस्वाहाचहुतभुक्प्रियेत्यमरः वर्षतिकामानिति वृषः मास्युपधात्कइतिकः आकंपयतिपापानीत्याकपिः अत्रांतर्भावितञिप्रत्ययार्थो ऽस्तिइरवारिवइतिइप्रत्ययः

पद्धत्यादिभ्यो वा पद्धती पद्धतिः ऐचमन्वादेः मनु पूतक्रतु वृषाकप्यग्निकुसितकुसिदानामैआदेशङीप् च स्त्रियां पुंयोगे पूतक्र
तायी कुसितायी कुसिदायी वृषाकपायी अग्नायी मनोरौ वा मनावी मनायी मनुः पत्न्यादयो निपात्याः पत्नी सपत्नी एकपत्नी-
वीरपत्नी॥ ॥

इनित इति ननुम् आगमजमानित्यमित्युक्तत्वात् वृषश्चासौ आकपिश्च वृषाकपिर्वृषाकपेः स्त्री वृषाकपायी हरविष्णू वृषाकपीत्य
मरः वृषाकपायी श्रीगौर्यौ इति चामर मनोरौ वा मनु शब्दस्यौ कारादेशः ऐकारादेशश्च वाङीपि मनोः स्त्री मनावी मनायी मनुः ईबभावः पत्न्यादयो निपा-
त्याः पत्नी आदिर्येषां ते पत्न्यादयः आदिशब्दः प्रकारे पतिशब्दांतस्य नांतत्वं निपात्यते न्वणङीबितीप् पत्नी समानः पतिर्यस्याः सा सपत्नी सहादेशिति समान
स्यसभावः एकः पतिर्यस्याः सा एकपत्नी वीराः पतिर्यस्याः सा वीरपत्नी सखिशब्दशिशुशब्दाभ्यामीप् निपात्यते सखी नविद्यते शिशुर्यस्याः सा दशिश्वी-
शिशुं विनेत्यमरः अनडुहः स्त्रियामीप् निपात्यते अनडुहश्चेति वाम् अनड्वाही अनडुही प्रागादिशब्दादीङ् निपात्यते गतौ प्राची पूर्वादि
क्नोलोपइतिलोपः पूजायां तु प्राञ्ची पूजार्थां च ते नैतिनलोपाभावः गतौ अचेरदीर्घश्चेत्यकारलोपः पूर्वदीर्घं प्रतीची पश्चिमादिक् पूजायां प्रत्यंची उदीची उत्तरादि

कृतिरश्वादय इति उदीचीदेशः अवाची दक्षिणा दिक् प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः उत्तरादिगुदीचीस्यादित्यमरः ॥ ६ ॥ क्वचिद्वा क्वचि
द्वा निपातनं भवति दृढः पतिर्यस्याः सा दृढपत्नी दृढपतिः वृषलः शूद्रः पतिर्यस्याः सा वृषलपत्नी वृषलपतिः एतच्छब्दात् स्त्रियामीप् तकारस्य नकारा
देशश्च वा निपात्यते एनी एता कुर्बुरेत्यर्थः चित्रं किर्मीरकल्माषशबलैता श्च कर्बुर इत्यमरः हरिणी हरिद्वर्णेत्यर्थः रोहिणी रोहिता रक्तेत्यर्थः श्येनी श्ये
ता श्वेतेत्यर्थः असितपलितशब्दयोरीप् तकारस्य क्नादेशश्च वा निपात्यते असिता असिक्नी कृष्णेत्यर्थः पलिता पलिक्नी वृद्धेत्यर्थः इतो मनुष्यजातेरी
प् मनुष्यजातिवाचिन इकारांतात् स्त्रियामीप् स्यात् दक्षस्यापत्यं दाक्षिः अत इञ् इति नीञ् अत्र गोत्रलक्षणा जातिः अवंतेरपत्यं स्त्री कुंतेरपत्यं स्त्री स्त्रिया

क्वचिद्वा दृढपत्नी दृढपतिः वृषलपत्नी वृषलपतिः एता एनी हरिता हरिणी रोहिता रोहिणी श्वेता श्वेती असिता असिक्नी पलिता
पलिक्नी इत्यादि इतो मनुष्यजातेरीप् दाक्षी अवंती कुंती ऊङुतः उदंतादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूः प्रत्ययः कुरूः
अयोपधात्किं अध्वर्युः स्त्री पङ्गोश्च पङ्गूः श्वशुरस्योकाराकारलोपश्च श्वश्रूः उरूत्तरपदादौपम्ये उपमानवाचिपूर्वपदादुरूत्त
रपदादूः करभोरूः ॥ ॥

मवंति कुंतीत्यपत्यप्रत्ययस्य लुक् अ
त्रापि गोत्रलक्षणा जातिः ऊङुतः कुरोरपत्यं स्त्री कुरूः स्त्रियामवंतिकुंतिकुर्भ्यस्त्यपत्यप्रत्ययस्य लुक् अत्रापि गोत्रलक्षणा जातिः अयोपधात्किं अध्व
र्युर्ब्राह्मणी शारवाध्येत्री शारवाध्यायिवंशोद्भवेत्यर्थः अत्र चरणलक्षणा जातिः अध्वरं यातीति विग्रहे मृगय्वादयश्चेत्यौणादिकेन सूत्रेण या धातोः
कुप्रत्ययो अध्वरशब्दस्यांत्यलोपश्च पंगोश्च पंगुशब्दो गुणवाचीतस्मात् स्त्रियामूः स्यात् श्वशुरस्योकाराकारलोपश्च श्वशुरशब्दात् स्त्रियामूः स्या
त् उकाराकारयोर्लोपश्चेसंनिहितत्वादंतस्यैव लोपोनत्वादेः पुंयोगे चेतीप् निवारणार्थमिदं उरूत्तरपदादौपम्ये उपमानवाचिपूर्वपदादुरूत्तरपदादूः उप
मीयते नेन तदुपमानं अधिकगुणविशिष्टमित्यर्थः करभवत् ऊरू यस्याः सा करभोरूः मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः ॥
॥ ६ ॥ ६ ६ ६ ६ ६

संहितशफलक्षणवामसहितसहादेरनौपम्येपिसंहितादिपूर्वपदादुरूत्तरपदान्नाम्नः स्त्रियामूः स्यात् उपमीयते अनयेत्युपमा तस्याभाव औप
म्यं न औपम्यं अनौपम्यं तस्मिन् संहितौ मिलितौ ऊरू यस्याः सासंहितोरूः शफाविव ऊरू यस्याः साशफोरूः शफं क्लीबे खुरः पुमान्नित्यमरेण क्ली
बत्वमुक्तं तथाऽपिकोशांतरे पुंस्त्वं शफः खुरे गवादीनां मूले विटपिनामपीति हेमचंद्रः लक्षणमस्त्यास्मिन् सलक्षणः अस्त्यर्थे अप्रत्ययः लक्षणौ ऊ
रू यस्याः सा लक्षणोरूः वामौ सुंदरौ ऊरू यस्याः सावामोरूः हितेन सह सहितौ सहितौ ऊरू यस्याः सासहितोरूः सहेते इति सहौ सहौ ऊरू य-
स्याः सासहोरूः नृनरयोर्वृद्धिश्च नृशब्दात् ऋणाईविति ईपिप्राप्ते नरशब्दात् जातिलक्षणे ईपिप्राप्ते वृध्द्यर्थं वचनं नुर्नरस्य वा स्त्री नारी ऊनास्ति ऋणई
वित्यस्याऽपवादः नाम्नोन इति सूत्रे केचित् स्यादौ रसे इत्यनुवर्तयंति तन्मते युवन् शब्दात्ति प्रत्यये नलोपः कथं स्यात् स्यादीनां रसस्य यत्वाभावात् उन्ध्य २

संहितशफलक्षणवामसहितसहादेरनौपम्येऽपिसंहितोरूः शफोरूः लक्षणोरूः वामोरूः सहितोरूः सहोरूः नृनरयोर्वृ
द्धिश्च नारी ऊनास्ति युवन्शब्दात स्त्रियान्तिः युवतिः इतिस्त्रीप्रत्ययाः लिंगार्थे प्रथमा नामार्थमात्रे लिंगमात्राधिक्येच प्रथ
माविभक्तिः

ते तु इः इति च्छेदः कर्तव्यः युवन् शब्दात्स्त्रियामीप् प्रत्ययो यूनोंत्यस्य तादेशश्चेति कथं तर्हि युवती करनिर्मथितामिति प्रयोगः यौति मिश्रीकरो-
ति पत्या सह इति यौते :शत्रंतात् श्वित इति ईपि कृते बोध्यः अत्रापि अनुपसर्जनादिति वक्तव्यं गौणे तु बहवो युवानो यस्यां बहुयुवा ऊनः स्त्रीप्रत्ययांतेभ्यः
शब्देभ्यः प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति परिभाषयास्याद्युत्पत्तिर्बोध्या अथ कारक प्रकरणं स्यादयः प्रत्यया नाम्नो विहितास्ते
षामर्थ विशेषे व्यवस्थां दर्शयितुमारभते लिंगार्थे प्रथमा लिंगंच अर्थश्चानयोः समाहारो लिंगार्थं तस्मिन् लिंगार्थे अर्थे प्रथमे सुंक्तौ कस्यार्थे इत्याकांक्षा
यां यस्मान्नाम्नः स्यादिर्विभक्तिर्विहिता तस्य नाम्नोर्थे एवेति नामार्थमात्रे मात्रं कार्त्स्न्येऽवधारणे इत्यमरः तत्र प्रथमा विभक्तिर्भवति सको नामार्थः ६८

॥ छ ॥ छ छ छ छ छ छ

कौ॰ चेद्यदि तेन प्राण्यंगे न सुखादिना सहतथा युतं प्राणिवद्युतं सहितं यथा प्राणियुतं तद्वत्प्राणिनियुतं भवतीत्यर्थः सुष्ठुस्तनौ यस्याः सा सुस्तनी
प्रतिमा प्राणिसदृशे प्रतिमादौ प्राणिनि इवेति प्राणिवत् स्तनादेः स्थितत्वात् स्वांगमस्ति नासिकादरौष्ठ जंघादंतकर्णशृंगा द्वाएभ्यो वेप् स्यात् नासिको
दरयोर्नक्रोडादि बहुस्वरादिति ओष्ठादीनां पंचानां तु संयोगोपधाच्चेति निषेधे प्राप्ते वचनं तुंगा नासिका यस्याः सा तुंगनासिकी मंदं उदरं यस्याः सा मंदो
दरी बिंबवत् ओष्ठौ यस्याः सा बिंबोष्ठी सुष्ठु जंघे यस्याः सा सुजंघी पक्षे आप् सुजंघेति ॥ ६१ ॥ अंगगात्रकंठपुच्छाच्च एभ्यो वेप् स्यात् असंयोगोपधा-
दिति निषेधे प्राप्ते वचनं सुष्ठु अंगं यस्याः स्वास्वंगी सुष्ठु गात्रं यस्याः सा सुगात्री सुष्ठु कंठो यस्याः सा सुकंठी सुष्ठु पुच्छं यस्याः सा सुपुच्छी पक्षे आप्
कबरमणिविषशरेभ्यः परात् पुच्छान्नित्यं ई प् स्यात् कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छी मणिः पुच्छे यस्याः सा मणिपुच्छी शरः पुच्छे यस्याः सा श

अंगगात्रकंठपुच्छाच्च स्वंगी सुगात्री सुकंठी सुपुच्छी पक्षे स्वंगेत्यादि कबरमणि विषशरेभ्यः परात् पुच्छान्नित्यं कब
रपुच्छी मणिपुच्छी विषपुच्छी शरपुच्छी उपमानात्पक्षपुच्छाभ्यां श्येनपक्षी श्येनपुच्छी नक्रोडादि बहुस्वरात् कल्या
णक्रोडा सुजघना सहनञ् विद्यमानपूर्वान्न सकेशा अकेशा विद्यमाननासिका ॥ ॥ रपुच्छी विषं पुच्छे यस्याः सा विष
पुच्छी उपमानात् पक्षपुच्छाभ्यां उपमानात्पराभ्यां पक्षपुच्छाभ्यां नित्यमीप् श्येनवत् पक्षौ यस्याः सा श्येनपक्षी श्येन इव पुच्छं यस्याः सा
श्येनपुच्छी नक्रोडादि बहुस्वरात् क्रोडादेर्बहुस्वराच्च स्वांगान्नेप् स्यात् अश्वानां मुरः क्रोडा सुष्ठु जघनं यस्याः सा सुजघना सहनञ् वि
द्यमानपूर्वान्न सहेत्यादि त्रिकपूर्वात् स्वांगान्नेप् स्यात् सह केशैः वर्त्तते या सकेशा सहादेरिति सहस्य सः अविद्यमानाः केशाः यस्याः सा
अकेशा नाइति नञो अकारादेशः विद्यमाना नासिका यस्याः सा विद्यमान नासिका स्वांगाद्वेत्यस्य नासिकोदरोष्ठेत्यस्य बाधको ऽयं
परत्वात् ॥ ॥

अल्पत्वेकिं चन्दनलिप्तान्यामूर्तिः स्वांगाद्वा स्वांगवाचकाद कारांतादसंयोगोपधाद्गोणाद्वा स्त्रियामीप् स्यात् यथासुष्ठुमुरवंयस्याः सासुमुरवी
सुष्ठुकेशाः यस्याः सासुकेशी पक्षे आबत इत्याप् असंयोगोपधात्किं सुष्ठुगुल्फौ यस्याः सासुगुल्फा उपसर्जनात्किं शोभना शिखेतिसुशिखा
शीङो ह्रस्वश्चेति खप्रत्ययः आबत इत्याप् किंच यद्यत्र स्वं अंगं स्वांगं गृह्येत तदासुमुरवाशालेत्यत्रापीप् स्यात् मुरवस्य शालांगत्वात् सुकेशीर
थ्ये त्यत्रचेप् नस्यात् केशानांरथ्यांगत्वाभावात् अतोव्याप्त्यतिव्याप्ति परिहारार्थमाह तत्स्वांगंत्रिधा तथाच अद्रवन्मूर्तिमत्स्वांगं प्राणिस्थमवि
कारजं अतत्स्थं तत्र दृष्टंच तेनचेत्तत्तथायुतं ॥ १ ॥ तत्स्वांगमुच्यते कीदृशअद्रवंद्रवतीतिद्रवंनद्रवमद्रवंसुष्ठुस्वेदोयस्याः सासुस्वेदाद्रवत्वाद
त्रस्वांगंनपुनः कीदृशंमूर्तिमत्स्पर्शवद्द्रव्यपरिमाणंमूर्तिः मूर्तिर्यस्यास्तीति तन्मूर्तिमत् सुष्ठुज्ञानंयस्याः सासुज्ञाना अमूर्तत्वात् अत्रस्वांगंनपु

अल्पत्वेकिम् चंदनलिप्तान्यामूर्तिः स्वांगाद्वा स्वांगवाचिनोऽदंतादसंयोगोपधादुपसर्जनाद्वा स्त्रियामीप् सुमुरवीसुमुरवा
सुकेशीसुकेशा संयोगोपधात्तु सुगुल्फा नासिकोदरौष्ठजंघादन्तकर्णशृंगाद्वा तुंगनासिकीतुंगनासिका मंदोदरी मंदोदराबिं
बोष्ठी बिंबोष्ठा एवंसुजंघीसुजंघा ॥ ॥

नः की॰ प्राणिस्थंमुरवनासिकांतः संचारीवायुः प्राणः प्राणोयस्या-
स्तीति प्राणी प्राणिनि तिष्ठतीति तत्प्राणिस्थं सुष्ठुमुरवंयस्याः सासुमुरवा शाला अप्राणिस्थत्वादत्रस्वांगं नपुनः की॰ अविकारजंवातपित्तकफा
नांविकृतिर्विकारः विकाराज्जातं विकारजं नविकारजं अविकारजं सुष्ठु शोफोयस्याः सासुशोफा शोफस्तु श्वयथुः शोथः पुमानित्यमरः विकारजत्वा
दत्रस्वांगंन यदिप्राणिस्थंस्वांगं तर्हि रथ्यादिगतानां केशादीनांस्वांगत्वं नस्यात् सुकेशीरथ्याइतिनसिद्ध्यत्यतो द्वितीयंलक्षणमाह चपुनः अतत्स्थंतत्र
दृष्टं स्वांगमुच्यते कदाचित्तत्र प्राणिनि दृष्टं तंप्रतितस्मिन् प्राणिनितिष्ठतीति तत्स्थंनतत्स्थं अतत्स्थं अप्राणिस्थमित्यर्थः अप्राणिस्थस्यापिकेशा
देः पूर्वं प्राणिनि दृष्टत्वात् स्वांगत्वमपि प्रतिमादिगतस्तनमुरवादीनां स्वांगत्वंनप्राप्नोति अप्राणिन्यदृष्टत्वात् सुस्तनी प्रतिमेति नसिध्यत्यतस्तृतीय
लक्षणमाह तेनचेत्ततृतथायुतं अतत्स्थमित्यनुषज्यते एतादृशं तदप्राणिस्थमुरवादिस्वांगमुच्यते ॥ ॥ ७ ७

शेषणेषष्ठीस्यात् मैवं वद विशेष्यस्याभेदविवक्षातो नषष्ठी विशेषणस्य भेद विवक्षायांतु षष्ठीभवत्येव उक्तंच नाम्नो द्विधैवसंबंधः सर्वदा-
भ्येषवस्थितः सामानाधिकरण्ये नषष्ठ्यावापिक्वचिद्भवेत् अत्रप्रकृत्यर्थः प्रत्ययार्थेसंबंधे विशेषणंप्रत्ययार्थः संबंधस्तुपुरुषेविशेषणंभवति
राज्ञः पुरुषः राजनिरूपितसेवकत्वसंबंधवान्पुरुषः ॥ इतिषष्ठी ॥ ६ ॥ आधारेसप्तमी आध्रियंते क्रियाअस्मिन्नित्याधारः संज्ञायामकर्तरि
चेत्यधिकरणेघञ् अधिकरणमित्यर्थः सआधारः षड्विधः अस्येतिषोढा अन्यत्रसिद्धयोराधाराधेययोः प्रादेशिकः संबंध उपश्लेषः उपउपरि-
श्लेषः उपश्लेषः उपश्लेषोऽस्यास्तीतिउपश्लेषेभवइतिवा औपश्लेषिकः अइकौचमत्वर्थेइतीकः णितोवेतिणित्वा वृद्धिः भवार्थेइकोवासामीप्यंसांनि
ध्यंसामीप्येभवः सामीप्यमस्यास्तीतिवासामीपकः केनेयेकाइतीकः अइकौचेति वा इकः अपृथग्भिन्नप्रदेशवर्जितयोर्देशयोराधाराधेययोः

आधारेसप्तमी औपश्लेषिकस्सामीपिकोऽभिव्यापकोवैषयिको नैमित्तिकऔपचारिकश्चेतिषोढास्सआधारः कटेशे-
ते कुमारोऽसौवटेगावस्सुशेरते ॥ तिलेषु विद्यते तैलं हृदि ब्रह्मामृतम्परम् ॥ युद्धे संनह्यते धीरोऽङ्गुल्यग्रे करि-
णांशतम् ॥ ॥

सर्वावयवसंबंधिकः अभिव्यापकः अभितः सर्वतोव्याप्यते आधेयेनेत्यभिव्यापकः कर्म्मणि घञ् ततः स्वार्थे
कः अन्यत्रभावोविषयः विषयेभवो वैषयिकः केनेयेकाइतिकः निमित्तंहेतुः निमित्तेभवोनैमित्तिकः केनेयेकाइतिकः निमित्तंफलंतदस्यास्तीति
वा अइकौचेतीकः अन्यत्रविद्यमानस्यसंबंधस्यान्यत्रालोपः उपचारः उपचारेभवः औपचारिकः केनेयेकाइतीकः उपचारोऽस्यास्तीतिवा अइकौ
चेतीकः तत्राधिकरणेकारकेसप्तमीस्यात् अत्रसप्तम्याआश्रयोऽर्थः प्रकृत्यर्थस्त्वभेदनेसंसर्गेणाश्रयेविशेषणं आश्रयस्तु क्रियायांविशेषणंभ
वतिकारकाणांक्रिययैवान्वयात् उक्तंच आश्रयोऽवधिरुद्देश्यः संबंधः शक्तिरेव वा यथायथंविभक्त्यर्थाः सुपांकर्मेतिवाक्यत ॥ १ कर्मणि
द्वितीया कर्तृसाधनयोस्तृतीया आधारेसप्तमीनामाश्रयोर्थोनिरूपभेदाच्चाभेदः अवधिः पंचम्यर्थः उद्देश्यः चतुर्थ्यर्थः संबंधः षष्ठ्यर्थः शक्तिः
प्रयमार्थः यथासंख्यंषण्णामुदाहरणान्याह असौ कुमारः कटेशेते गावोवटेसुशेरतेस्वपंति तैलंतिलेषुविद्यते हृदि अमृतं सुखरूपं परमुत्तमं नि

पतयाज्ञायतेसोऽवधिः विश्लेषस्याऽवधिर्विश्लेषावधिस्तस्मिन् विश्लेषावधौ अस्याऽपादानसंज्ञाउक्तंचहरिणा अपायेयदुदासीनंचलंवाय
दिवाचलं ध्रुवमेवातदावेशात्तदपादानमुच्यते अपायेविश्लेषेसाध्येसति ध्रुवमवधिभूतंकारकमतदावेशात् विश्लेषजनकक्रियाऽनावेशाद-
पादानमुच्यते कीदृशंचलमचलमुदासीनंवेत्यर्थः तत्रानुक्तेअ पादानकारकेपंचमीस्यात् अत्र प्रकृत्यर्थः पंचम्यर्थोऽवधावभेदेनसंसर्गेण विशेषणप्रत्य
यार्थोऽवधिस्तु क्रियायांविशेषणंभवति कारकाणांक्रिययैवसंबंधात् हिमवतः पर्वताद्गंगाऽवतरति अत्रावतरणविशिष्टायांगंगायाविश्लेषावधिभूतो
हिमवान् हिमवदभिन्नावधिकनिःसारणानुकूलोगंगाभिन्नाश्रयकोवर्तमानोव्यापारः धावतोऽश्वाच्चैत्रः पतति पतनक्रियाविशिष्टस्यचैत्रस्यवि
श्लेषावधिरश्वः शीघ्रगत्यनुकूलव्यापाराश्रयोऽश्वस्तदभिन्नावधिकंचैत्रनिष्ठंपतनमित्यर्थः अनुक्तेकिं उपाध्यायोविप्रःउपसमीपेऽधीतेऽस्मादित्य
पादानेघञ् ॥ इतिपंचमी ॥ संबंधेषष्ठी विशेष्यविशेषणविश्लिष्टिः संबंधः आह च एतौ संबंधौ इति प्रतीति जनकः संबंधः समानार्थोनिनियतज्ञा
ऽभावात् ससंबंधोद्विविधः क्रियाकारकसंबंधोद्रव्यगुणसंबंधश्चेति क्रियाकारकसंबंधोपिद्विविधः विशेषः सामान्यंचेति तत्र विशेषेकर्म
त्वादिरूपेसंबंधेविहिताऽपवादभूताद्वितीयादयोविभक्तयः सामान्यसंबंधेतु षष्ठीउक्तंच संबंधः कारकेभ्योन्यः क्रियाकारकपूर्वकः श्रुता
यामश्रुतायांचक्रियायांसोभिधीयते नटस्यशृणोतिमाषाणामश्नाति नटसंबंधिश्रवणानुकूल एककर्तृकोव्यापारः माषसंबंधिभोजनानुकू
ले एककर्तृकोव्यापारः विशेषविवक्षायांतुनटेन गीतंशृणोतिमाषानश्नातीति द्रव्यगुणसंबंधोयथा राज्ञः पुरुषः अत्रसेव्यसेवकरूपः राज्ञः पुत्रः
अत्रपितापुत्ररूपः तंतूनांपटः अत्रअवयवावयविरूपः पटस्यरूपंगुणगुणिरूपः माषाणांराशिः समूहसमूहिरूपः कुरूणांराजा पाल्यपालकरू-
पः चैत्रस्यवाहनंवाह्यवाहकरूपः शब्दस्यार्थः अत्रवाच्यवाचकरूपः चक्षुषोविषयोरूपं अत्रबोध्यबोधकरूपः अग्नेर्धूमः अत्रव्याप्यव्याप
करूपः पटस्याभावः अत्र प्रतियोग्यनुयोगिरूपः उपगोरपत्यं अत्रापत्यापत्यवद्रूपः कुशूलस्यान्नमत्राधाराधेयरूपइत्यादि ननुसंबंधस्यो-
भयनिष्ठत्वात् कस्मात्षष्ठीउच्यते विशेषणात्षष्ठीभवति उक्तंभेद्यभेदकयोः श्लिष्टिः संबंधोन्योन्यमीक्ष्यते द्विष्ठो यद्यपिसंबंधः षष्ठ्युत्पत्तिस्तुभेद
कात् भेद्यभेदकयोः स्वरूपंयथा परार्थेस्वार्थनिक्षेपादप्रधानं विशेषणं विशेष्यंतुप्रधानंस्यात्स्वार्थस्यैवप्रकाशनात् ननुशुक्लः पट इत्यत्रापिवि

रावयतीति लोकरावणः भिदेः कर्म्मणिक्तः यद्यपि क्रिया [illegible] विशेष्यतैव ज्ञेयासत्वप्रधा
नानि नामानीत्युक्तत्वात् रामनिष्ठोयोव्यापारो धनुराकर्षणादिस्तत्व [illegible] णाविशेषणनैव तथापि कृदुक्तानां कारकाणां विशेष्यतैव ज्ञेयासत्वप्रधा
योगाश्रयोरावणइत्यर्थः रावणंहंतिरावणो हन्यते इत्यत्रतु क्रियाविशेष्यकः शाब्द [illegible] भिन्नाश्रयकोयोव्यापारः शरीरभेदनादिस्तत्साध्यः प्राणवि
गः शराभिन्नाश्रयशरीरभेदनादिव्यापारसाध्यसाधनानुकूलोरामनिष्ठ धनुराकर्षणादिर्व्यापारः प्रधानमाख्यातमित्युक्तत्वात् रावणनिष्ठोयः प्राणवियो
र्तरिवुण् तद्धितोक्ते शाब्दिकः इकः प्रत्ययः समासोक्ते कृतं विश्वं येनसकृतविश्वः अनुक्ते करणे किम् [illegible] र्थः अनुक्तेकर्तरि किं हरिः करोतिपाचकः क
तृतीया ॥ ६९ ॥ दानपात्रेचतुर्थी दीयतेइतितद्दानं कर्मणिल्युट् दानस्यपात्रंदानपात्रंदानयोग्यमित्यर्थः योग्य [illegible] नेनेति जीवनः करणेल्युट् प्रत्ययः इति
नसंज्ञासम्यक्प्रदीयतेऽस्मै तत्संप्रदानं अपुनर्ग्रहणाय स्वत्वनिवृत्तिपूर्वकं यत् परस्वत्वोपपादनं तद्दानं अतएव रजकस्य वस्त्रं ददाति [illegible] र्थीरज-

दानपात्रेचतुर्थी वेदविदे गान्ददाति क्रिययायमाप्नोति तत्रापिचतुर्थी पत्येशेते विश्लेषावधौ पंचमी विश्लेषोविभागस्तस्या-
वधौ पञ्चमी हिमवतोऽवतरति गङ्गा धावतोऽश्वादपतत् सम्बन्धेषष्ठी राज्ञः पुरुषः ॥ ॥

कस्येति संबंधेषष्ठी ननु श्रोत्रियायक
न्यां ददातीत्यादौ चतुर्थी न स्यात् स्वत्वत्यागाऽभावादुच्यते स्वस्यभावः स्वत्वं आत्मत्वं आत्मीयत्वं ज्ञातित्वं धनत्वंच आत्मत्वा त्मीयत्वयोस्त्यागोनास्तीति
ज्ञातित्वस्यत्यागोस्तिपरगोत्रप्रवेशाद्धनत्वस्यचत्यागः अतोऽत्रपरस्वत्वस्यापादानरूपंमुख्यं दानं तत्रदानपात्रे अनुक्ते संप्रदाने कारकेचतुर्थी स्यात् वे
दं वेत्तीति वेदवित्तस्मै वेदविदेचैवोगां ददाति अत्रचतुर्थ्या उद्देश्योर्थः वेदविदुद्देश्यकगोनिष्ठस्वत्वत्यागानुकूल एककर्तृकोवर्तमानोव्यापारः अनुक्ते
किं दानीयोविप्रः दीयतेऽस्मै इति दानीयो विप्रः बाहुलकात्संप्रदाने अनीयप्रत्ययः क्रिययायमाप्नोति तत्रापिचतुर्थी क्रियया कर्ता यमाप्नोतिसंबध्ना-
त्यभिप्रैति तत्रचतुर्थीस्यात् पत्येशेते शयनक्रिययापतिमभिप्रैति तदाभिमुख्येन शेतेइत्यर्थः राज्ञेकरंददाति दानक्रियया राजानमभिप्रैति तदा-
भिमुख्येनददातीत्यर्थः इतिचतुर्थी विश्लेषावधौ पंचमी श्लेषणं श्लेषः संयोगः विगतो विरुद्धोवा श्लेषो विश्लेषो विश्लेषो विभागः अवधीयते एकरू

७०

यान्वतेडुपच पाके तंडुलानोदनं पचति सः ओदनं निर्वर्तयतीत्यर्थः ओदनमिति मुख्यं कर्म करणत्वाविवक्षायां तंडुलानित्यत्रानेन कर्मसं
ज्ञाविवक्षायां तु तंडुलैरोदनं पचतीति दंड दंडग्रहणे चुरादिः गर्गान् शतं दंड सुर्वर्धिन्नात मिति मुख्यं कर्म्म गर्गानित्यत्रत्वपादानत्वाविवक्षायाम
नेन कर्म्मसंज्ञा विवक्षायां तु गर्गेभ्यः शतं दंडयतीति रुधिर् आवरणे व्रजमवरुणद्धि गामितिमुख्यं कर्म्म व्रजमित्यत्रत्वधिकरणत्वाविव-
क्षायामनेन कर्म संज्ञाविवक्षायां तु व्रजे वरुणद्धि गामिति प्रच्छ ज्ञीप्सायां माणवकं पंथानं पृच्छति पंथानमिति मुख्यं कर्म तादर्थ्याविवक्षायां तु मा
णवक मित्यत्रानेन कर्म्मसंज्ञा विवक्षायां तु माणवकाय पंथानं पृच्छति चिञ् चयने वृक्षमवचिनोति फलानीति मुख्यं कर्म्म वृक्षमित्य-
त्रापादानत्वाविवक्षायामनेन कर्म्मसंज्ञा विवक्षायां तु वृक्षादवचिनोति ब्रूञ् व्यक्तायां वाचि शासु अनुशिष्टौ माणवकं धर्म्मं ब्रूते शास्ति वा सः धर्म्ममिति
मुख्यं कर्म्म माणवक मित्यत्र तु तादर्थ्याविवक्षायामनेन कर्म्मसंज्ञा विवक्षायां तु माणवकाय धर्म्मं ब्रूते शास्ति वा जि जये शतं जयति देवद
त्तं सः शतमिति मुख्यं कर्म्म देवदत्त मित्यत्रत्वपादानत्वा विवक्षायामनेन कर्म्मसंज्ञा विवक्षायां तु शतं जयति देवदत्तात्सः मंथ विलोडने सुधां
क्षीरनिधिं मथ्नाति हरिः सुधामिति मुख्यं कर्म्म क्षीरनिधि मित्यत्राधिकरणत्वा विवक्षायाम नेन कर्म्मसंज्ञा विवक्षायां तु सुधां क्षीरनि-
धौ मथ्नाति मुष स्तेये देवदत्तं शतं मुष्णाति शतमिति मुख्यं कर्म्म देवदत्तमित्यत्रापादानत्वाविवक्षायामनेन कर्म्मसंज्ञा विवक्षायां तु देवदत्ता
च्छतं मुष्णाति सः णीञ् प्रापणे हृञ् हरणे कृष् विलेखने वह प्रापणे ग्राममजां नयति सः एवं हरतीत्यादि अमामिति मुख्यं कर्म्म ग्राम मित्यत्र
त्वधिकरणा विवक्षायामनेन कर्मसंज्ञा विवक्षायां तु ग्रामेऽजां नयति हरति कर्षति वहति वेति एतदर्थका धातवोऽन्येपि संज्ञेयाः माणवकं धर्म्मं
भाषते अभिधत्ते वक्तीत्यादि अकर्मकधातुभिर्योगे देशः कालो भावो गंतव्योऽध्वा च कर्मसंज्ञक इति वाच्यं कुरून् स्वपिति मासमास्ते गोदोह-
मास्ते गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्तासणौ गत्याद्यर्थानां शब्दकर्म्मकाणामकर्मकाणां च धातूनामणौ यः कर्त्ता स णौ कर्म
स्यात् प्रत्यवसानं भक्षणं शब्दः कर्म कारकं येषां ते शब्दकर्मकाः अनुसन्ने ञिप्रत्यये शुद्धधातुवाच्यां क्रियां प्रतियः कर्त्ता स ञिप्रत्ययांत धातुवा
च्यां क्रियां प्रति कर्मसंज्ञः स्यादित्यर्थः यथा शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत् आशयच्चामृतं देवान् वेदमध्यापयद्विधिं १ आसयत्सलिले पृथ्वीं यः सा

टी॰ सु॰
पू॰

मेश्रीहरिर्गतिः गत्यर्थे यथा शत्रवः स्वर्गमगच्छन् तान् शत्रून् श्रीहरिः स्वर्गमगमयदिति गमेरणि प्रत्ययांतावस्थायां शत्रवः कर्तारस्तेण्यंताव-
स्थायां कर्मोऽभवन् स्वर्गकर्मकं शत्रुनिष्ठयद्गमनम् तदनुकूलो हरिकर्तृकश्चिरातीतो व्यापारः बुद्ध्यर्थे यथा स्वे स्वकीयाः वेदार्थमविदुस्तान् स्वान्
श्रीहरिर्वेदार्थमवेदयत् विदेरण्यंतावस्थायां स्वे कर्तारस्ते ण्यंतावस्थायां कर्माऽभवन् देवा अमृतमाश्नन् तान् देवान् श्रीहरिरमृतमाशयत् अशेरण्यंता
वस्थायां देवाः कर्त्तारस्ते ण्यंतावस्थायां कर्माभवन् विधिर्वेदमध्यैत तं ब्रह्माणं श्रीहरिर्वेदमध्यापयदपाठयदित्यर्थः अधिपूर्वके धातोरण्यंतावस्थायां वि
धिः कर्तासण्यंतावस्थायां कर्माभवत् सलिले जले पृथ्वी आस्ते तां पृथ्वीं श्रीहरिः सलिले आसयत् स्थापयति स्म आसेरण्यंतावस्थायां पृथ्वी कर्त्री सा ण्यंताव-

कर्त्तरि करणे च तृतीया भिन्नश्शरेण रामेण रावणो लोकरावणः कराग्रेण विदीर्णोऽपि वानरैर्युध्यते पुनः ॥ श्री ॥

स्थायां कर्माभवत् स श्रीहरिर्मे मम गतिः स्यादित्यन्वयः। इति द्वितीया ॥ ६ ॥ कर्तरि करणे च तृ... क्रियां करोति स कर्ता धातूपात्तव्यापा
राश्रय इत्यर्थः उक्तं च धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते इति व्यापाराश्रयः कर्तेत्युक्तं व्यापारोऽर्थः तदेव करणं अत्र तृतीयाया व्यापार आश्रयश्च
स त्रिविधः स्वतंत्रः प्रयोजकः कर्मकर्ता चेति क्रियासाध्यतेऽनेनेति साधनं क्रियासिद्ध्युपकविशेषणं भवति उक्तं च क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनं
पृथक् वाच्यौ तत्र सर्वत्र प्रकृत्यर्थ आश्रये अभेदेन संसर्गेण विशेषणं व्यापारस्तु ... भवति रामेण कर्त्रा शरेण करणेन रावणो भिन्नः कीदृशः लोकान्
तरं विवक्ष्यते यदा यत्र तत्तत्र करणं स्मृतं। तत्रानुक्ते कर्तरि करणे च...

रावयतीति लोकरावणः भिदेः कर्म्मणिक्तः यद्यपि क्रियाः ... नानिनामानीत्युक्तत्वात् रामनिष्ठोयोव्यापारोधनुराकर्षणादिस्तत्वा... विशेषणनैव तथापिरूदुक्तानां कारकाणां विशेष्यतैव ज्ञेयासत्वप्रधा
योगाश्रयोरावणइत्यर्थः रावणंहंतिरावणोहन्यते इत्यत्रतु क्रियाविशेष्यकः शाब्द बोधः भिन्नाश्रयकोयोव्यापारः शरीरभेदनादिस्तत्साध्यः प्राणवियोगः शराभिन्नाश्रयशरीरभेदनादिव्यापारसाध्यसाधनानुकूलोरामनिष्ठधनुराकर्षणादिर्व्यापारः प्रधानमाख्यातमित्युक्तत्वात् रावणनिष्ठोयः प्राणवियो
र्तरिवुण् तद्धितोक्ते शाब्दिकः इकः प्रत्ययः समासोक्ते कृतंविम्बंयेनसकृतविम्बः अनुक्तेकरणेकिम्... र्थः अनुक्तेकर्तरिकिं हरिः करोतिपाचकः क
तृतीया॥ ५९॥ दानपात्रेचतुर्थीदीयतेइतितद्दानं कर्मणिल्युट् दानस्यपात्रंदानपात्रंदानयोग्यमित्यर्थः योग्ये... सेनेति जीवनः करणेल्युट्प्रत्ययः इति
नसंज्ञासम्यक्प्रदीयतेऽस्मै तत्संप्रदानंअपुनर्ग्रहणाय स्वत्वनिवृत्तिपूर्वकं यत् परस्वत्वोपपादनं तद्दानंअतएव रजकस्य वस्त्रंददाती... चतुर्थीरज-

दानपात्रेचतुर्थीवेदविदे गान्ददाति क्रिययायमाप्नोति तत्रापिचतुर्थी पत्येशेते विश्लेषावधौ पंचमी विश्लेषोविभागस्तस्या-
वधौ पञ्चमी हिमवतोऽवतरति गङ्गा धावतोऽश्वादपतत् सम्बन्धेषष्ठी राज्ञःपुरुषः॥ ॥ कस्येति संबंधेषष्ठी ननु श्रोत्रियायक
न्यांददातीत्यादौ चतुर्थीनस्यात् स्वत्वत्यागाऽभावादुच्यते स्वस्यभावः स्वत्वं आत्मत्वं आत्मीयत्वंज्ञातित्वं धनत्वंच आत्मत्वा त्मीयत्वयोस्त्यागोनास्तीति
ज्ञातित्वस्यत्यागोस्तिपरगोत्रप्रवेशाद्धनत्वस्यचत्यागः अतोऽपरस्वत्वस्यापादानरूपंमुख्यंदानं तत्रदानपात्रे अनुक्ते संप्रदानेकारकेचतुर्थीस्यात् वे
दं वेत्तीति वेदवित्तस्मै वेदविदेचैत्रोगांददाति अत्रचतुर्थ्या उद्देश्योर्थः वेदविदुद्देश्यकगोनिष्ठस्वत्वत्यागानुकूल एककर्तृकोवर्तमानोव्यापारः अनुक्ते
किंदानीयोविप्रः दीयतेऽस्मै इतिदानीयोविप्रः बाहुलकात्संप्रदाने अनीयप्रत्ययः क्रिययायमाप्नोतितत्रापिचतुर्थी क्रियया कर्ता यमाप्नोतिसंबध्ना-
त्यभिप्रैति तत्रचतुर्थीस्यात् पत्येशेते शयनक्रिययापतिमभिप्रैति तदाभिमुख्येन शेते इत्यर्थः राज्ञेकरंददाति दानक्रियया राजानमभिप्रैति तदा-
भिमुख्येनददातीत्यर्थः इतिचतुर्थी विश्लेषावधौपंचमी श्लेषणं श्लेषः संयोगः विगतो विरुद्धोवा श्लेषो विश्लेषो विश्लेषो विभागः अवधीयते एकरू

तिः नवतिः एकनवतिः द्विनवतिः द्वानवतिः त्रिनवतिः त्रयोनवतिः चतुर्णवतिः पंचनवतिः षण्णवतिः सप्तनवतिः अष्टनवतिः अष्टानवतिः एकोनशतं
शतं शतस्यपूरणः शततमः ६७ ६७ शतादेर्नित्यंशतप्रभृतिभ्यस्तमडेवस्यात् नडट् असंख्यादेः षष्टिशब्दाच्चानित्यन्तमट् षष्टितमः संख्यादेः षष्टेस्तुडट्
तमटौ एकषष्टिः एकषष्टितमः संख्यायाः प्रकारेधासंख्यावाचिशब्दात्प्रकारेऽर्थे धाप्रत्ययः स्यात् द्वौ प्रकारौ द्विधा त्रयः प्रकारास्त्रिधाचतुः प्रकारांश्चतु-
र्धा दशप्रकारादशधात्त्काद्यंतंचेत्यव्ययत्वाद्विभक्तेर्लुक् द्वित्रिभ्यामेधाधमुञ्चौवा आभ्यामेतौस्तः प्रकारेऽर्थे पक्षे धा द्वौ प्रकारौ यस्यलोपद्वतीकारलोपःद्वैधा
धमुञ् उकारउच्चारणार्थः द्वैधं द्विधा त्रयः प्रकाराः त्रेधात्रैधंत्रिधा एकाद्ध्यमुञ्वा एकशब्दात् ध्यमुञ् वा स्यात् उकारउच्चारणार्थः पक्षे धा एकः प्रकारः ऐक
ध्यं एकधा एकादाकिनिच्चासहाये असहाय वाचिन एकशब्दादाकिनिच् स्यात् यस्यलोप इत्यल्लोपः एकाकी कप्रत्ययोऽपि एककः क्रियाया आवृत्तौकृत्वसुच् सं-

...संख्यादेर्नित्यम् शततमः संख्यायाः प्रकारेधा द्विधात्रिधाचतुर्धादशधा द्वित्रिभ्यामेधाधमुञ्चौवा द्विधात्रेधाद्वैधम् त्रैधम् एका
द्ध्यमुञ्वा ऐकध्यम् एकधा एकादाकिनिच्चासहाये एकाकी क्रियाया आवृत्तौ कृत्वसुच् पञ्चकृत्वः सप्तकृत्वः द्वित्रिचतुर्भ्यस्सुच्
द्विः त्रिः चतुः एकस्यसकृच्चादेशश्च एकवारंसकृत् ॥ ॥

ख्यावाचिशब्दात् क्रियाया आवृत्तावर्थे कृत्वसुच् प्रत्ययः स्यात् पौनःपुन्येगणन
मावृत्तिः पंचवारान् पंचकृत्वः सप्तवारान् सप्तकृत्वः त्त्काद्यंतंचेत्यव्ययत्वाद्विभक्तेर्लुक् वारशब्दस्य क्रियोत्पत्त्याधारकालवाचित्वात्कालाध्वनोरिति द्वितीया
संख्यायाः किं भूरिवारान् भुंक्ते भूरिशब्दस्यलौकिकसंख्यावाचित्वेपिनेहग्रहणं द्वित्रिचतुर्भ्यस्सुच् एभ्यः सुच्प्रत्ययः स्यात् क्रियाया आवृत्तौगणने उकारउच्चा
रणार्थः कृत्वसोऽपवादोयं द्वौवारौ द्विः त्रीन्वारान् त्रिः चतुरोवारानिति रात्सस्येति सलोपः चतुः त्त्काद्यंतंचेत्यव्ययत्वाद्विभक्तेर्लुक् बहोर्वाधाऽऽसन्नकालेपक्षे
कृत्वसुच् बहुधा बहुकृत्वोवा दिवसस्यभुंक्तेआसन्नकाले किं बहुकृत्वोमासस्यभुंक्ते दिवसस्येतिसंबंधेषष्ठी एकस्यसकृच्चादेशश्च एकशब्दस्यस्थानेसकृदि
त्यादेशः स्याच्चात्सुच्प्रत्ययः संयोगांतस्येतिसुलोपः गुरुत्वात्सर्वस्यादेशः एकवारमितिसकृत् ॥ ६७ ६७ ६७

...ः त्रिदेः कर्म्मणिक्तः यद्यपि त्रिश...

बहुव्रीहौतु त्रिर्दशेति त्रिदशाः सुप्रत्यया ऽर्थेबहुव्रीहिः अशीतानुव्यशीतिः प्राक् शतादित्येव त्रिशतं त्रिसहस्रं त्रयोदशानांपूरणः त्रयोदशः चतुर्दशानांपू
रणः चतुर्दशः पंचदशानां पूरणः पंचदशः षोडशानां पूरणः षोडशः सप्तदशानांपूरणः सप्तदशः अष्टादशानां पूरणः अष्टादशः ७ विंशत्यादेर्वातमट्
विंशतिप्रभृतिभ्यो वा तमट् स्यात् पक्षे एकादशादेरितिडट् इत्वादी पृडट्प्रत्ययेतु एकोनविंशतेः पूरणः विंशतेस्तिलोपोडितिविंशतिशब्द स्यातिइत्यस्यलोपः स्यात्
डितिप्रत्ययेएकोनविंशः तमडिएकोनविंशतितमः एकविंशः एवंद्वाविंशतितमः द्वाविंशः त्रयोविंशतितमः त्रयोविंशः चतुर्विंशतितमः चतुर्विंशः पंचविंशतित
मः पंचविंशः षड्विंशतितमः षड्विंशः सप्तविंशतितमः सप्तविंशः अष्टाविंशतितमः अष्टाविंशः किंच पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशी-
तिनवतिशतमेते निपातेसिद्धाः एकोनत्रिंशतः पूरणः एकोनत्रिंशत्तमः एकोनत्रिंशः त्रिंशतः पूरणः त्रिंशत्तमः त्रिंशः एवं एकत्रिंशत्तमः एकत्रिंशः द्वात्रिं-

विंशत्यादेर्वातमट् विंशतितमः एकेनऊना विंशतिः एकोनविंशतिः एकोन विंशतेः संख्यापूरक एकोनविंशतितमः विंशतेस्ति
लोपोडितिविंशः त्रिंशत्तमः त्रिंशः द्वाभ्यामधिका अशीतिर्द्व्यशीतिः द्व्यशीतेः संख्यापूरको द्व्यशीतितमः द्विचत्वारिंशत्तमः
...चत्वारिंशत्तमः षष्टेःसं ख्यापूरणः षष्टितमः सप्ततितमः नवतितमः ॥ ॥

शत्तमः द्वात्रिंशः त्रयस्त्रिंशत्तमः त्रयस्त्रिंशः चतुस्त्रिंश
त्तमः चतुस्त्रिंशः पंचत्रिंशत्तमः पंचत्रिंशः षट्त्रिंशत्तमः षट्त्रिंशः सप्तत्रिंशत्तमः सप्तत्रिंशः अष्टात्रिंशत्तमः अष्टात्रिंशः एकोनचत्वारिंशत्तमः एकोनच
त्वारिंशः द्व्यष्टनोरात्वं वा त्रेस्त्रयश्च वा चत्वारिंशत्प्रभृतौ परे चत्वारिंशत्तमः चत्वारिंशः एकचत्वारिंशत्तमः एकचत्वारिंशः एवं सर्वत्रडट् मटौ द्विचत्वारिंशत्
द्वाचत्वारिंशत् त्रिचत्वारिंशत् त्रयश्चत्वारिंशत् पंचचत्वारिंशत् षट्चत्वारिंशत् सप्तचत्वारिंशत् अष्टचत्वारिंशत् अष्टाचत्वारिंशत् एकोनपंचाशत्
पंचाशत् एकपंचाशत् द्विपंचाशत् द्वापंचाशत् त्रिपंचाशत् त्रयःपंचाशत् चतुःपंचाशत् पंचपंचाशत् षट्पंचाशत् सप्तपंचाशत् अष्टपंचाशत् अष्टापंचा-
शत् एकोनषष्टिः षष्टिः एकषष्टिः द्वाषष्टिः द्विषष्टिः त्रिषष्टिः त्रयःषष्टिः चतुःषष्टिः पंचषष्टिः षट्षष्टिः सप्तषष्टिः अष्टषष्टिः अष्टाषष्टिः एकोनसप्ततिः स
प्ततिः एकसप्ततिः द्विसप्ततिः द्वासप्ततिः त्रिसप्ततिः त्रयःसप्ततिः चतुःसप्ततिः पंचसप्ततिः षट्सप्ततिः सप्तसप्ततिः अष्टसप्ततिः अष्टासप्ततिः एकोननव

एवंपरः परेरणेषष्ठी निर्द्धार्यमाणवाचिभ्य एवैतावभिधानस्वभावात् कतरः कण्वइतिजात्या निर्द्धारणं तंत्रमधीते वेत्ति वा तांत्रिकः कतमइतिगुणेननिर्द्धारणंतर्क्क दी॰ सु॰
लक इतर इन येत्ति वा तार्किको यतर इतिगुणेन निर्द्धारणंततरस्तर्कमुद्दृणहातु कतरोध्यापक इतिक्रियया निर्द्धारणं कतरोदेवदत्तइतिसंज्ञया निर्द्धारणं एवंयतमः घू॰
ततमः अनयोरेकतरो मैत्रः एषामेकतमः पक्षे किंशब्दस्य कः यच्छब्दस्य यः तद्शब्दस्य सः आख्यातव्ययेत्यकप्रत्ययेतु किमः कः यकः सकः कक इतितु
नोक्तमक सहितस्यापि किमोभाष्ये कादेशविधानात् संख्येयविशेषावधारणे द्वेस्तीयः संख्यातुं योग्यः संख्येयः विशेषणावधारणं विशेषावधारणं संख्येय
स्य विशेषावधारणं संख्येयविशेषावधारणं तस्मिन्नर्थे द्विशब्दात्तीयप्रत्ययः स्यात् पूरणे इत्यधिकारोयंम् त्रेस्तृश्चत्रिशब्दात्तीयः स्यात् त्रेः स्थाने तृश्च त्रया
णां संख्या पूरणः तृतीयः षट्कतिकतिपयचतुर्भ्यस्थट् एभ्यस्थट्स्यादुक्ते थे षण्णां पूरणः षष्ठः कतीनां पूरणः कतिथः कतिपयानां पूरणः कतिपयथः च

संख्येयपरे विशेषावधारणे द्वेस्तीयः द्वयोः पूरणो द्वितीयः त्रेस्तृश्च तृतीयः षट्कतिकतिपयचतुर्भ्यस्थट् षष्ठः कतिथः कतिपय-
थः तुर्य्यः चतुरो येयौ चस्य लोपः तुर्य्यः तुरीयः पञ्चादेर्म्मट् पञ्चमः सप्तमः एकादशादेर्डट् एकादशः द्वादशः द्व्यष्टनोरात्वं सं-
ख्यायामुत्तरपदे अष्टादशः त्रेस्त्रयस् त्रयोदशः चतुर्दशः पञ्चदशः षोडशः सप्तदशः ॥
तुर्णां पूरणश्चतुर्थः टित्वात् स्त्रियामीप् युष्मद-
स्मदोः षष्ठी चतुर्थीति निर्देशात् षष्ठे षकारस्य जवत्वं चतुर्थे रेफस्य विसर्गश्च न चतुरो येयौ चस्य च लोपः चतुर्शब्दात् यईय एतौ स्तः चकाराकारयोर्लोपश्च च
तुर्णां पूरणः तुर्यः तुरीयः पंचादेर्मट् पंचप्रभृतिभ्यो मट् स्यात् पंचानां पूरणः नाम्नो नो लोपशिति नलोपः पंचमः सप्तानां पूरणः सप्तमः अष्टानां पूरणः अष्टमः नवा
नां पूरणः नवमः दशानां पूरणः दशमः टित्वात् स्त्रियामीप् दशमी एकादशादेर्डट् एकादशशब्दप्रभृतिभ्यो डट् स्यात् डित्वाट्टिलोपः डित्वादीप् एकश्चदशा-
चेति महादेरित्यात्वं एकादशानां पूरणः एकादशः द्वौ च दश चेति द्व्यधिका दशेति वा द्व्यष्टनोरात्वं संख्यायामुत्तरपदे एतयोरात्वं स्यात् बहुव्रीहौ अशीतिप
रे च न द्वादशः बहुव्रीहौ किं द्विरावृत्ता दशेति सुप्रत्ययार्थे बहुव्रीहिः द्विदशाः ड प्रत्ययः अशीतिपरे किं द्व्यशीतिः प्राक् शतादित्युक्तत्वं नेह द्विशतं द्विसहस्रं द्वाद ११५
शानां पूरणः द्वादशः त्रेस्त्रयस् त्रिशब्दस्य त्रयस् स्यात् बहुव्रीहौ अशीतिपरे च न त्रयश्च दश चेति त्रयोदशः ॥ ॥ ॥

ईलोपोज्याशब्दादीयसः ईयसः किंज्येष्ठः प्रियोरुबहुलगुरुदीर्घाणांलोहितादित्वादिमनूप्रेमेत्यादिबहोरिष्ठेर्यिः इष्ठेतिलुप्तषष्ठीकंपदंबहुशब्दादिष्ठप्रत्य

त्ययेकारस्ययिःस्यात् ईयसुप्रत्ययेपरेईकारस्यलोपश्चबहोर्भूश्चबहोःस्यानेभूःस्यादिष्ठेयस्वोः परतः अतिशयेनबहुः भूयिष्ठः इष्ठः भूयान् ईयसुः

विन्मतोर्लुक् विनोमतोश्चलुक्स्यादिष्ठे यसोःपरतः मतुग्रहणंवतोरप्युपलक्षणंबोध्यं अतिशयेनस्रग्वीस्रजिष्ठः स्रजीयान् अतिशयेनत्वग्वान्त्वचिष्ठः

त्वचीयान् किमोः व्ययादारव्याताम्वतरतमयोराम्वद्रव्यप्रकर्षे किमःव्ययाख्यातेभ्यःपरौयौ तरतमौ तदंतेभ्यआमुस्यात् नतुद्रव्यप्रकर्षेउकार उच्चारणार्थःनि

रनुबंधग्रहणेनसानुबंधस्येतिपरिभाषयानुड्विधौनास्यग्रहणम् अन्यथापचतितराणामितिस्यात् प्रमाणेदघ्नद्द्वयसड्मात्रटः प्रथमान्तान्नाम्नःतत्प्रमाण-

ईलोपोज्याशब्दादीयसः ज्याशब्दात्परस्येयसईकारस्यलोपः अतिशयेनवृद्धः प्रशस्योवाज्यायान् ज्येष्ठः बहोरिष्ठेयिः ब

होरुत्तरस्येकारस्ययिरादेशोबहोर्भूश्च भूयिष्ठः भूयान् विन्मतोर्लुक् किमोः व्ययादारव्याताम्वतरतमयोराम्व द्रव्यप्रकर्षे किंत

[illegible]न्तमाम् कुतस्तराम् कुतस्तमाम् उच्चैस्तराम् गायतिउच्चैस्तमाम् पचतितराम् पचतितमाम् पठतितराम् पठतितमाम् द्रव्य-

प्रकर्षे [illegible] उच्चैस्तमस्तरुः परिमाणेदघ्नद्द्वयसड्मात्रटः जानुदघ्नम् शिरोद्वयसम् पुरुषमात्रम् पुरुषहस्तिभ्यामणूच पौरुषम् हा

स्तिनम् वत्वन्तात्स्वार्थेद्वयसड्मात्रटौतावद्द्वयसम् तावन्मात्रम् द्वयोर्बहूनांचैकस्यनिर्द्धारणेकिमादिभ्योडतरडतमौ भवतोः का

पदः कतरः भवतान्तांत्रिकः कतमः भवतोर्यतरस्तार्किकः ततरउद्गृण्हातु ॥ ॥ मस्येत्यर्थे एतेस्युः आयामस्तुप्रमाणंस्यादिति ने

ह गृह्यते किंतुप्रमाण मिह परिच्छेदकमात्रं तत्रमात्रट् आद्यौतूर्ध्वमान एवभवतः तथैववृद्धैः स्वीकृतत्वात् टित्वात् ङ्गि तृ इति स्त्रियामीप् जानुप्रमाण

मस्य जानुदघ्नं शिरः प्रमाणमस्य शिरोद्वयसं पुरुषः प्रमाणमस्य पुरुषमात्रं जलं पुरुषहस्तिभ्यामणूच आभ्यांप्रमाणेर्थेःणपिस्यात् वत्वंता त्स्वार्थेद्व

[illegible] मत्वलुकृत्यर्थे एतौस्तः तावदेवतावद्द्वयसं द्वयोर्बहूनांचैकस्यनिर्द्धारणेकिमादिभ्योडतरडतमौकिम्यत्तदेकेभ्यो द्वयोर्मध्येएकस्य

सति [illegible] योडतरः बहूनांमध्येएकस्यनिर्द्धारणेडतमश्चस्यात् द्वयोर्बहूनामिति ॥ ॥ ॥ ॥

एवंपरः परइतिपरस्परं परौपराविति परस्परौ परेपरे इतिपरस्परे परंपरमितिपरस्पर मित्यादि इतरशब्दस्यतुसमासवद्भावात्समासप्रत्यययोरितिविभक्तेर्लुक् इतर इतरइतिइतरेतरः इतरौइतराविति इतरेतरौ इतरे इतरे इतिइतरेतरे इतरमितरमिति इतरेतरमित्यादिस्त्रीनपुंसकयोरुत्तरपदस्थायाविभक्तेराम्भावोवास्त्रियांक्लीबेचोत्तरपदस्थविभक्तीनामामादेशोवाभवति स्त्रियांयथा अन्याअन्येतिपूर्वपदस्य विभक्तेःसिःपरपदस्यविभक्तेस्त्वाम् अन्योन्यांआमभावपक्षे अन्योन्यः बहुलग्रहणात् स्त्रियामित्याप्प्रत्ययाभावोदलद्वयेअन्येअन्येइतिअन्योन्यंअन्योन्यौअन्यांअन्याइति अन्योन्या अन्योन्ये अन्यामन्यामितिअन्योन्यांअन्योन्यमित्यादि एवंपरस्परांपरस्परःपरस्परापरस्परौपरस्परांपरस्परेपरस्परांपरस्परमित्यादि एवमितरेतरांइतरेतरः इतरेतरां इतरे तरे इतरेतरौइतरेतरांइतरेतरेइतरेतरांइतरेतरमित्यादि क्लीबेतु अन्यअन्यदिति अन्योन्यां अन्योन्यंस्यमोःप्रत्यययोः स्थानेऽत्वन्यादेरितिअत्वादेशाभावोबाहुलकादेव इमेकन्यौइमेकर्तृणीवा अन्यामन्यामन्यदन्य द्वाभोजनंकारयतः ननुअन्योन्यंपरस्परमित्यादौकेवलपूर्वपदविभक्तीनांस्यादेशविधानस्यचरितार्थत्वमस्ति अन्योऽन्यसंसक्तमहस्त्रियामितिअन्योन्याश्रयइतिपरस्पराक्षिसादृश्यमितिअदृष्टपरस्परैरित्यादौसमासप्रत्यययोरित्यनेनपूर्वपदविभक्तीनांस्यादेशस्य कथंलुग्नस्यादितिचेदत्राहुः बाहुलकात्समासविषयेपूर्वपदविभक्तीनांस्यादेशस्यलुग्नभवतीत्यर्थः अकृच्छ्रे ११९
प्रियसुखयोर्वाद्वित्वं अनयोर्द्वित्वंसमासवच्चवास्यात् द्विवचनेसमासवद्भावात्स्यादिलुकिकृतेपुनः ॥ ❀ ❀

एवम्परस्परम् वाचस्पत्यादित्वात्सः इतरेतरम् इतरेतरेणेत्यादि स्त्रीनपुंसकयोरुत्तरपदस्थायाविभक्तेराम्भावोवा अन्योऽन्यां अन्योऽन्यंपरस्परां परस्परं इतरेतरामितरेतरं वा इमेब्राह्मण्यौकुलेवाभोजयतः दलद्वयेऽप्याबभावः क्लीबेतुविरहस्स्यमोःसमासेसेरलुक् चेति सिद्धम्बाहुलकात् त्वयम् समासेसेरलुक् इत्यस्योदाहरणंतु अन्योऽन्याश्रयः परस्पराक्षिसादृश्य मित्यादिकं बोध्यम् ॥
अकृच्छ्रे प्रियसुखयोर्वाद्वित्वम् प्रियप्रियेण ददाति प्रियेणवा सुखसुखेन ददाति सुखेनवा अर्थात् प्रियमपिवस्त्वनायासेनददातीत्यर्थः यथास्वेयथायथम् यथाशब्दस्यद्वित्वं क्लीबत्वञ्चभवतियथास्वमिति वीप्सायामव्ययीभावः योयं आत्मायद्यच्चात्मीयं तद्यथास्वम् ॥ ॥

गुणेशुक्लादयः पुंसिगुणिलिंगास्तुतद्वतीत्युक्तत्वात् यत्रशुक्लादयः शब्दाद्रव्यवाचकास्तत्रगुणाउपसर्जनीभूताएवसंति अतोत्रद्रव्यवाचकशुक्लादिपदस्यगुणवाचक

शुक्लादिपदस्यचग्रहणंशुक्लः शुक्ल इतिबहुव्रीहित्वाद्विभक्तेर्लुक्शुक्ल शुक्ल पटः गुणोपसर्जनद्रव्यवाचिन उदाहरणम् शुक्लं शुक्लमितिसमासवत्त्वाद्विभक्तेर्लुक् शुक्ल

शुक्लरूपं केवलगुणवाचिनउदाहरणम् अनुक्रमेद्योत्येद्वे अनुक्रमद्योतकंपदं द्विःस्यात् वीप्साऽभावादयमारंभः एकस्यवृक्षादेरेकमेवमुख्यंमूलमयंचभवति

इतरेषांभागानामापेक्षिकोऽयमूलव्यपदेशः स्थौल्यसौक्ष्म्येऽपिनैकरूपेयथामूलंस्थूलंयथाऽयंसूक्ष्मंतथानेतरेभागाइतिवीप्सायाअसंभवः मूले मूलेस्थूलस्तथाऽ

ग्रेऽग्रेसूक्ष्मः सम्क्रमेणप्रवृत्तावनेकधाप्रयोगः संबोध्यो हियावद्भिः शब्दैः प्रयोजनमेतितावंतः प्रयोगावाच्याइत्यर्थः क्रियासमभिहारेद्वे पौनः पुन्यंभृशार्थश्च

गुणोपसर्ज्जनद्रव्यवाचिनः केवलगुणवाचिनश्चेहगृह्यंते शुक्लशुक्लः पटः शुक्लशुक्लं रूपम् अनुक्रमे द्योत्येद्वे मूले मूलेस्थूलोवृ

क्षः सम्क्रमेण प्रवृत्तावनेकधाप्रयोगः सर्प्प ३ बुध्यस्व ३ क्रियासमभिहारेद्वे लुनीहि लुनीहि इत्येवायं लुनाति कर्म्मव्यति-

हारेसर्व्वादेर्द्वित्वंसमासवच्च बहुलम् बहुलग्रहणादन्यपरयोर्न्नसमासवत् इतरशब्दस्य नित्यं समासवत् असमासवद्भावेपू

र्वपदस्थायाविभक्तेस्सिरादेशोवाच्यः अन्योन्यौअन्योन्यान् अन्योन्येनकृतम् अन्योन्यस्मै दत्तमित्यादि अन्योन्येषां पुष्करैरा

मृशान्ति इतिमाघः ॥

क्रियासमभिहारस्तत्रपदेद्विः स्यात् पौनः पुन्येयथाआख्यातकृदंतयोरेव पचतिपचति भुक्त्वाभुक्त्वा

भृशार्थेयथा लुनीहि लुनीहीति कर्म्मव्यतिहारेसर्वादेर्द्वित्वंसमासवच्चबहुलम् क्रियाविनिमयेऽर्थे सर्वादिगणस्यद्वित्वंस्यात् नित्यमेवेद द्वित्वंबाहुल

कंतु समासवद्भावस्यैव तेनान्यपरशब्दयोः समासवद्भावो न इतरशब्दस्य चनित्यमेवसमासवद्भावोभवतीत्यर्थः असमासवद्भावेपूर्वपदस्यविभक्तेः

सिरादेशोवाच्यः पूर्वपदस्यप्रथमादिविभक्तीनांस्थानेसिरेवमवत्यसमासवद्भावेअन्यः अन्यइतिअन्योन्यः अन्यौअन्याविति अन्योन्यौ अन्येअन्ये इति-

अन्योन्ये अन्यंअन्यमिति अन्योन्यमित्यादिषु सर्वत्र पूर्वपदस्य विभक्तेः सिकृतेतनो विसर्गः अतोऽत्युरित्युत्वे उओ इत्योत्वे एदोतोऽत इत्यलोपेचरूपसि

द्धिः ॥ ॥ ७ ७ ७ ७ ७

दूराक्रान्त

उपर्य ध्य धसः सामीप्ये द्विः सामीप्यार्थवाचिन एतेद्विस्युः सामीप्यं प्रत्यासत्तिस्तच्चकालकृतं वा कालकृतस्य सामीप्यस्योदाहरणमध्यधिसुखमिति अन्यद्दू यं देशकृतस्य सामीप्यस्योदाहरणं वाक्यादेः संबोधनस्याऽसूयासम्मतिकोपकुत्सनभर्त्सनेषु एष्वर्थेषु विद्यमानस्य वाक्यादिस्थितस्य संबोधनस्य द्वित्वं स्यात् न नु कोपासूयाभ्यां पृथक्कुत्सनभर्त्सनग्रहणमपार्थकं न ऽसूयां विनाकुत्स्यते नाप्यऽकुपितो भर्त्सयति इति चेदत्राहुः गुरवो हि हितैषिवात् कुपिता अपि भर्त्सनं कु र्वंति विनाप्यसूयया कुत्सां कुर्वंत्यतो पृथक्तयोर्निर्देशः सम्मतिः पूजा द्विरुक्त एकशब्दो बहुव्रीहिवत् बहुव्रीहौ यत्कार्यमुक्तं तद्द्विरुक्ते एकशब्दे भवतीत्यर्थः ब हुव्रीहिसमासवत्वात् समासप्रत्यययोरिति विभक्तिलोपः पुंवदेति पुंवद्भावश्च एक एकमित्यत्र द्वयोरपि विभक्तेर्लुकि कृते बहुव्रीहिसमासवद्भावादेवकृतद्धितस

उपर्य्यध्यधसस्सामीप्ये द्विः ऊपर्य्युपरि ग्रामम् ग्रामस्योपरिष्टात्समीपदेश इत्यर्थः अध्यधिस्करवम् स्करवस्योपरिष्टात्समीपदेश इत्य र्थः वाक्यादेस्सम्बोधनस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु असूयायामुदाहरणम् सुन्दरसुंदर वृथा ते सौन्दर्य्यम् देवदेव वन्द्यो ऽसि कोपे दुर्विनीतदुर्विनीत इदानीं ज्ञास्यति कुत्सने धानुष्कधानुष्क वृथा ते धनुः भर्त्सने चोरचोर घातयिष्यामि त्वाम् द्विरुक्त एकशब्दो बहु व्रीहिवत् तेन विभक्तिलोपपुम्वद्भावौ एकैकमक्षरम् एकैकया हुत्या इह पूर्वभागे पुंवद्भावादवग्रहे विशेषः पदविभागोऽवग्रहः एकैकया इ त्यादि विशेषः एकैकस्मै देहि पीडायां द्योत्यायां द्वेस्तो बहुव्रीहिवच्च गतगतः विरहात्पीड्यमानस्येयमुक्तिः गतगता सादृश्ये द्योत्ये गुणव चनस्य द्वेस्तो बहुव्रीहिवच्च पटुपट्वी पटुपटुः पटुसदृशः ईषत्पटुरिति यावत् ॥ ॥

मासा श्चेत्यनेन समुदायात्स्या द्युत्पत्तिः अंतरंगैकसंख्याऽवरुद्धो द्विरुक्तार्थः संख्यांतरे निराकांक्ष एव इत्युक्तत्वादेकवचनमेव एकैक येत्यत्र सर्वादेः समासादा विति पूर्वभागे पुंवद्भावः एकस्मै एकस्मै इत्येकैकस्मै पीडायां द्योत्यायां द्वेस्तो बहुव्रीहिवच्च पीडार्थद्योतकं पदं द्विः स्यात् गतः गत इति बहुव्रीहिवद्भावाद्विभक्तेर्लु गुगतगतः गतागतेति पुंवद्वेति पुंवद्भावः गतगता ॥ ॥ ६९ ६९ ॥ ॥ सादृश्ये द्योत्ये गुणवचनस्य द्वेस्तो बहुव्रीहिवच्च तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्वं सादृश्यं पट्वी पट्वीति पुंवद्वेति पुंवद्भावः पटु पटुरिति बहुव्रीहिवद्भावाद्विभक्तेर्लुक् पटुपटुः ॥ ॥

अधः अस् अधस्तात् अस्तात् प्रत्ययः अवरस्यां अवरस्याः अवरावा अवः अस् अवस्तात् अस्तात् अवरस्याः स्तात् परे ऽ वा अवस्तात् अवरस्तात् एवं दे[illegible]
कालेच दिशि रूढेभ्यः किम् ऐंद्र्यां वसतिसप्तम्याद्यर्थे किं पूर्वं ग्रामं गतः दिगादिवृत्तिभ्यः किं पूर्वस्मिन् गुरोर्वसति दक्षिणोत्तराभ्यामतस् असा [illegible]पवादः
दक्षिणस्यां दक्षिणस्याः दक्षिणावा दिक् दक्षिणतः उत्तरस्यां उत्तरस्याः उत्तरावा उत्तरतः अतस् परा ऽ वराभ्यामतसृवा पक्षे स्तात् परस्यां परस्या[illegible]रतः अ[illegible]
रस्यां अवरस्याः अवरावा अवरतः अतस् पक्षे ऽ स्तात् परस्तात् अवरस्तात् अंचत्यता दिक् शब्दादस्तात् प्रत्ययस्य लुक् तद्धितलुकि स्त्रीप्रत्ययस्य [illegible]यः प्राच्यां
प्राच्याः प्राचीवा दिक् प्राक् उदक् एवं देशे कालेच ऊर्ध्व शब्दाद्रिरिष्टात् प्रत्ययौ स्तात् द्विषये ऊर्ध्वस्योपादेशश्च ऊर्ध्व ऊर्ध्वात् ऊर्ध्वो वेति उपरि उपरिष्टात् [illegible]
दातृ प्रत्ययो ऽ परस्य पश्चादेशश्चा ऽ स्ता द्विषये उत्तरात् अधरात् दक्षिणात् अदूरे वर्तमानेभ्यः उत्तरा ऽ धर दक्षिणेभ्य एन प्रत्ययो वा सप्तमी प्रथमा वि[illegible]त्त्यर्थे उत्तर[illegible]
उत्तरो वेति उत्तरेण अधरस्मिन् अधरो वेति अधरेण दक्षिणास्मिन् दक्षिणो वेति दक्षिणेन पक्षे उत्तरात् अधरात् दक्षिणात् आत् प्रत्ययः उत्तरतः अधः अधस्तात्
दक्षिणतः केचिद्दिक् शब्दमात्रादेन प्रत्ययमाहुः पूर्वेण ग्रामं अपरेण ग्रामं दक्षिणा शब्दादा प्रत्ययः सप्तमी प्रथमा विभक्त्यर्थे दक्षिणस्यां दक्षिणा वेति दक्षिणाद
क्षिणोत्तराभ्यां दूरे ऽ र्थे आ आहि प्रत्ययौ दक्षिणस्यां दिशि दूरे इति दक्षिणाहि दक्षिणा उत्तरस्यां दिशि दूरे इति उत्तराहि उत्तरा अव्ययत्वाद्विभक्तेर्लुक् सर्वत्र अथस
र्वं पदं दिरुच्चारयेदित्यधिकारो ऽ यं वीप्सायां पदं द्विः व्याप्तुमिच्छा वीप्सा व्याप्तिप्रतिपिपादयिषेतियावत् व्याप्तिः कात्स्न्यं तच्चाधिकारकं सर्वे ब्राह्मणा आमंत्रिता
इत्यादौ यथा नहि जगतीतले विद्यमाना ब्राह्मणाः सर्वेपि केनचिदामंत्रयितुं शक्यंते इति स्वग्रामस्थस्व जातीय ब्राह्मणानां संकोचो ऽ स्य ऽ भ्युपेयते तद्वन्नापि सक
ल वृक्षसेचन सामर्थ्यं कस्यापि मनुष्यस्य नास्तीति यत्र वाटिकादौ वृक्षसेचनार्थं सामर्थ्यं कस्यापि मनुष्यस्य नास्तीति यत्र [illegible]कादौ वृक्षसेचनार्थमधिका
रस्तद्वाटिकास्थ वृक्षाणामेव कात्स्न्यं वृक्षं वृक्षं सिंचतीत्यादौ गम्यते इत्य ऽ भ्युपेयं यत्र तु संकोचे कारणं नास्ति तत्रा ऽ संकोच इष्ट एव यथा जातौ जातौ निधनमुपे
तीति तस्यां वीप्सायां वाच्यायामेकस्य पदस्य स्थाने द्वे पदे समुदिते युगपदोदेशत्वेन विधीयेते इत्यर्थः वृक्षं वृक्षमित्यत्र प्रत्येक निष्ठमेकत्वमेव हि प्रतिभासते ऽ
तोन बहुवचन प्रसंगः परेर्वर्जने वा द्वित्वं वर्जनार्थ वाचिनः परेर्वा द्वित्वं स्यात् परिपरि त्रिगर्तेभ्य इत्यत्र परियोगे पंचमी वाग्रहणात् परिहरेः संसार इति ॥ छ

छ छ छ छ छ छ

नाधार्यप्रत्ययांते च्व्यर्थे कृभ्वोः ण्वमुलौ नाधार्थप्रत्ययांते च्व्यर्थविषये उपपदे कृभूभ्यां क्त्वाणमुलौ स्तः विनञ्भ्यां नानाञौ विति नानाञ् प्रत्ययः संख्यायाः प्रकारे धा इति धा प्रत्ययः द्वित्रिभ्यां मेधा धमुञौ चेति एकात्ध्यमुञ् वेति च धार्थप्रत्ययाः एवं द्वैधं कृत्वेत्यादि प्रत्ययग्रहणं किम् द्विरुकृत्वा एथक्कृत्वा द्विरुकृमध्ये विनार्थे चेति रुद्रः द्विरुगुक्तं च सामीप्ये इत्यमरमाला पृथक् विनांतरेणर्ते हिरुक् नाना च वर्जने इत्यमरः तूष्णींशब्दे भुवः क्त्वाणमुलौ तूष्णींशब्दे उपपदे भूधातोः क्त्वाणमुलौ स्तः अन्वग् चानुकूल्ये गम्ये अन्वक्शब्दे उपपदे भुवः क्त्वाणमुलौ वा स्तः वर्णानुकारः वर्णनिर्देशे वाच्ये ऽक्षरानुकारप्रत्ययः स्यात् निर्देशोऽनुकरणम् कारप्रत्ययमाह बहुलग्रहणाम

नाधार्थप्रत्ययान्ते च्व्यर्थे कृभ्वोः ण्वमुलौ अनानानानाकृत्य नानाकृत्वा नानाकारम् विनाकृत्य विनाकृत्वा विनाकारम् नानाभूय नानाभूत्वा नानाभावम् एकधाभूय एकधाभूत्वा एकधाभावम् प्रत्ययग्रहणं किम् हिरुक्कृत्वा पृथग्भूत्वा तूष्णींशब्दे भुवः क्त्वाणमुलौ तूष्णींभूय गतः तूष्णींभूत्वा तूष्णींभावम् अन्वक् चानुकूल्ये अन्वक्शब्दे भुवः क्त्वाणमुलौ वानुकूल्ये गम्ये अंन्वग्भूयते अन्वग्भूत्वा अन्वग्भावम् आगतः पार्श्वतः [illegible] पृष्ठवानुकूलो भूत्वा आनुकूल्ये किम् अन्वग्भूत्वा तिष्ठति पृष्ठतो भूत्वेत्यर्थः वर्णात्कारः अकारः इकारः वकारः रादिफो वा रेफः रकारः लोकाच्छेषस्य सिद्धिर्यथामातरादेः इति श्रीरा[illegible]श्रमविरचितायां सिद्धान्तचन्द्रिकायामुत्तरार्द्धे

त्र कर्तव्यम् तेन क्वचिन्न रादिफो वारकाराक्षरात् इफप्रत्ययः स्यात् लोकाच्छेषस्य सिद्धिर्यथामातरादेः उक्तादन्यः शेषः अत्रानुक्तस्य सिद्धिः साधनं लोकात् व्याकरणानुज्ञातव्या यथा माता च पिता चेति मातरपितरौ मातरेति निपातनादिति श्रीमत्पाठकधुर्यभक्तिविनयानंदं [illegible]या नानाशास्त्रविचारजातपरमानंदाः सभावोज्ज्वलाः संवेगादिगुणैर्वंशोद्भतजनाविख्यातकीर्तिप्रभास्तेषामस्ति विचक्षणो विनयवान् शिष्यः सदानं[illegible]र्वे वर्षे सदानंदः सुधीमुदे सिद्धांतचंद्रिकावृत्तिं सदानंदेन सारतः ज्ञेयमिति सदानंदं समाप्तम् इति श्री सिद्धांतचंद्रिकायाव्याख्यासुबोधनीसमाख्यातासदानंदीवाप्तसमाप्ता ॥ मि० वैशाख सु० ८ संम्वत् १९३१ भृगुवार ॥

॥ इतिश्रीसिद्धांतचंन्द्रिकासटीककृदन्तउत्तरार्द्धसमाप्ता ॥